
कविकुलगुरु - कालिदास - संस्कृत - विश्वविद्यालयः

श्रीगणेशाय नमः ॥ निर्विघ्नमस्तु ॥ मूले वह्निविति ॥ अनुमितिरुक्तलक्षणलक्षिता पर्वतो व
ह्निमानित्याकारा तद्धेतुः तत्कारणमित्यर्थः व्याप्तिज्ञानं धूमो वह्निव्याप्य इत्याकारकं ज्ञानं त
द्विषयो व्याप्तिः ॥ व्याप्तिपदार्थः के इत्यर्थः ॥ ननु प्रामाण्यनिरूपणमसमाप्य व्याप्तिग्रहोपायाभि
धानात् प्राक् व्याप्तिस्वरूपाभिधानमर्थान्तरमुक्तं ॥ अत्र ज्ञातार्थाभिधानमर्थान्तरमिति तल्लक्ष
णात् ॥ अतो दीधितिकृता समारब्धेत्यभिहितं तच्चानुमितिहेतुज्ञाननिरूपणे लभ्यमपि अनुमितिः
अनुमानप्रामाण्यसाधनं तु हेतौ तत्प्रयोजके ज्ञाननिरूपणे विषयत्वसम्बन्ध्यर्थः ॥ इत्यर्थान्तरा
श्रयणात् ॥ तेन पूर्वोक्तार्थान्तरपदस्य वैयर्थ्यमिति शंकापि परास्ता तत्र समत्वस्य प्रतिपादनवि
शेषणत्वं न युज्यते उपायस्य वक्ष्यमाणत्वेन बाधादत आह ॥ समारब्धमिति ॥ एतच्च अनुमान
प्रामाण्यनिरूपणं वृत्तमिति भ्रमवारणाय तस्य वृत्तित्वे अनुमानप्रामाण्योपपादकत्वरूपतद्

पोद्घातलंभः॥ समित्युपसर्गस्य साफल्यमर्थः आङ्पूर्वकरभधातोरारंभोर्थः स चाद्यकृतिः सा चा
थानुमानं न प्रमाणमिति वाक्यानुकूला कृतिरेवआद्यकृतित्वं च स्वविषयककृतिध्वंसासमानकाली
न स्वविषयककृतित्वं स्वपरीक्षणोद्देश्यकृतीयादिकृतिनिवारणाय कालीनांतं कृतिविशेषणपूर्वकृतिवा
रणाय स्वविषयकत्वं न द्विशेषणं॥ अतीतत्वं विषयत्वं च निष्ठार्थः॥ अतीतत्वं वर्त्तमानध्वंसप्रतियो
गित्वं तस्य कृतावन्वयः तस्याश्च विषयत्वेऽन्वयः एकप्रत्ययार्थविशेषितप्रकृत्यर्थस्यापरप्रत्ययार्थेऽन्व
यस्य पक्व ओदन इत्यादौ दृष्टचरत्वात्॥ अन्यथोदनेऽतीतपाककर्मत्वान्वयानुपपत्तेः वर्त्तमान
त्वादेः कालस्य धात्वाख्यातान्यतरार्थविशेषणत्वमिति नियमात्॥ तथा च वर्त्तमानध्वंसप्र
तियोगिसफलनिरुक्ताद्यकृतिविषयत्वं समारब्धत्वं फलितं केचित्तु धात्वर्थआद्यकृतिविष
यत्वं तदेकादेशाक्रांतोऽतितान्वय इत्याहुः॥ परीक्षणमिति॥ दीधितौ॥ ल्युडंतपाठमभिप्रेत्य

भावेत्तः

परिक्षेत्यस्यैवत्वाविवरणं परिक्षान्तअनुमानप्रामाण्यग्रहप्रतिबंधकयथार्थज्ञानजनकत्वाद्य प्रयोगः।
यथार्थज्ञानेच्चानुमानप्रामाण्यवगाहिनान्वयः॥वस्तुवस्तु॥ परिक्षरागपरमतनिराकरणपूर्वकस्व
मतव्यवस्थापनं॥ परमतंअनुमानधर्मिकप्रामाण्यप्रकारकज्ञानंतन्निराकरणंतदनुत्पादप्रयोजक
स्तानानुकूलव्यापारः॥ तज्जनकपरामर्शः प्रामाण्यज्ञानजनकअसिध्युद्भावनादितत्तादृशनि
राकरणपूर्वयस्येतिव्युत्पत्यात तत्पूर्वकत्वंतदुत्तरकाली नत्वंस्वमतव्यवस्थापनअनुमानधर्मिक
प्रामाण्यप्रकारकज्ञानोत्पादप्रयोजकज्ञानानुकूलेव्यापारः शाब्दप्रयोगरूपः अत्रानुमानंनप्र
माणं प्रमाणतावच्छेदकधर्मान्यत्वादितिचार्वाकाः अनुमानंप्रमाणंप्रमाणतावच्छेदकधर्मवत्वादि
तिनैष्यायिकाः मध्यस्थोक्ताभ्यां लिंगाभ्यांपरामर्शद्वयंज्ञायतेनत्वनुमितिः॥ सत्प्रतिपक्ष
स्थलेपरस्परानुमितिप्रतिबंधात्॥ अतएवपरामर्शः प्रामाण्यज्ञानंसंपाद्यं॥ अनयोरेकतरं

ज॰ टि॰

रु[illegible]:

बोध्यं विरुद्धार्थः ग्राहकत्वादिति वक्ष्यमाणत्वादिति संप्रदायः॥ अथवा परमतं परसिद्धार्थः अ
नुमानप्रामाण्यं तन्निराकरणं तद्विषयकज्ञानेमध्यस्याप्रामाण्यज्ञानसंपादनं दुष्टहेतुजन्यत्व
रूपलिंगस्थापकदोषोद्भावनेन तदुत्तरकालीनं स्वमतव्यवस्थापनं स्वसिद्धयुक्तिजन्या अनु
मानप्रामाण्यव्यवस्थितिजनकशब्दप्रयोगः व्यवस्थितिरप्रमाण्यज्ञानानास्कंदितानुमितिः सद्धेतु
जन्यत्वस्याप्रामाण्यव्यवर्त्तकत्वात्॥ स्वसिद्धत्वचतत्वानुग्राहीत्वार्थमिति॥ उपायनिरूपणं किम
र्थमित्याशंकावारणाय परीक्षाकारणं तोपादानं॥ यद्यपि सर्वमिदमिति ग्रंथावतरणादेवैत
ल्लाभात्पुनरिदं व्यर्थं॥ तथापि प्रियस्यैकवाक्यताज्ञानं नास्ति तस्य शीघ्रोपस्थितये तदुक्तं॥ व्याप्ति
ग्रहोपायप्रतिपादनं तत् ज्ञानजनको व्यापारः शब्दप्रयोगात्मकः॥ ज्ञाने च विषयितासंबंधेन
व्याप्तिग्रहोपायान्वयः व्याप्तिस्वरूपनिरूपणं व्याप्तिस्वरूपविषयकज्ञानजनको व्यापारः धा

राम
२

त्वर्थः आद्याकृतिः आख्यातार्थः आश्रयत्वं वर्त्तमानत्वं च ॥ तथा च वर्त्तमानध्वंसप्रतियोगिस्व
विषयकफलवत्त्वं इति विषयोऽनुमानधर्मिकप्रामाण्याभावप्रकारकज्ञानानुत्पत्तिप्रयोजकज्ञा
नानुकूलव्यापारोत्तरकालीनानुमानधर्मिकप्रामाण्यप्रकारकज्ञानोत्पादप्रयोजकज्ञानानुकूलव्या
पारः तत्कारणीभूतो यो व्याप्तिग्रहोपायज्ञानानुकूलव्यापारस्तत्कारणीभूतो व्याप्तिस्वरूपज्ञाना
नुकूलव्यापारस्तद्विषयककृतिध्वंसासमानकालीनतद्विषयकवर्तमानकृत्याश्रयो मणिकार
इति विशिष्टबोधः ॥ एवं द्वितीयपक्षेऽप्यूह्यं ॥ न च परीक्षाया उपायप्रतिपादकस्य वक्तव्यत्वेन जन्य

दु

जनकभावासंभवान्नोत्कीर्तनमसंगतमिति वाच्यं प्रयोजकत्वे तन्नात्पर्यात् प्रथमतो गुरूणो
पायस्य निरूपणं कुतो न कृतं इत्याशंकावारणार्थं निदानं तं ॥ गुरूणा प्रथमतो व्याप्तिस्वरू
पं न निरूपितं चेत् ॥ शिष्यं प्रति गुरूणा तादृशव्याप्तिज्ञाने इदं कारणमिति व क्रमयोग्यं ॥ वि

ऽेषणीभूतव्याप्तिस्वरूपज्ञानाभावेनतस्यतादृशवाक्यार्थबाधासंभवादितिप्रथमतस्तन्निरुक्तं॥
तथाचव्याप्तिज्ञानत्वंतत्प्रत्येवप्रामाण्योपोद्घातसंगतेरुपायनिरूपणोपयिकत्वंनतद्धून्यंप्रतीतिबो
धयितुंतस्यास्वरूपनिरूपणोपयिकत्वेनप्रथमतस्तदेवरूतमितितथाचेतिचिंतांप्रकृतासिध्य
र्थामुपोद्घातंविदुर्बुधाः इत्यत्रप्रकृतसिध्युपपादकत्वेनचिंताविषयत्वंलभ्यते॥तत्रचिंतायाः सं
गतिसामान्यलक्षणनिवेशोपयिकत्वंबोध्यंप्रकृतस्यानुमानप्रामाण्यस्यसिद्धिः॥यथार्थज्ञा
नंतदुपपादकत्वंतन्निर्वाहकत्वंउक्तरीत्यातत्प्रयोजकत्वादितिफलेनतावदितिप्रथमव्याप्तिरि
त्यनुषज्यते॥अव्यभिचरितत्वं॥अव्यभिचरितत्वशब्दबोध्ये॥तथाचाव्यभिचरितत्वप
दजन्यप्रतीतिविषयत्वावच्छिन्नेव्याप्तिभेदः साध्यः साध्याभाववदवृत्तित्वादिरूपपंचाव्य
भिचरितत्वभेदः प्रत्येकरूपेणहेतुः॥नचप्रत्येकंहेतुत्वेभागासिद्धिः॥कूटस्यहेतुत्वेस्व

राम
३

रूपासिद्धिः ॥ तत्तद्धेतुदस्यतत्तद्व्यक्तिमात्रावृत्तित्वादितिवाच्यं ॥ अनुमितिहेतुव्याप्तिज्ञानेइ
त्यनुवर्त्तते ॥ तत्रनिष्ठत्वंसप्तम्यर्थः तथाचतादृशव्याप्तिज्ञाननिष्ठजनकतायांअव्यभिचारपदा
र्थविषयत्वावच्छिन्नत्वाभावः पूर्वोक्तपंचाव्यभिचारप्रकारत्वावच्छिन्नत्वाभावकूटवत्वेनहेतु
तासाधयः ॥ नतत्प्रकारकत्वावच्छिन्नत्वप्रसिद्धिश्चसाध्याभाववदवृत्तित्वविशिष्टधूमवान्पर्व
तइत्यादिविशिष्टवैशिष्ट्यबोधजनकतायामितिदिक् ॥ यद्वाअनुमितिहेतुज्ञानेव्याप्तिःकृत्
स्यकीदृशविशिष्टनिरूपितविषयत्वंअनुमितिकारणतावच्छेदकमितितात्पर्यात् ॥ अनुमितीति ॥
अनुमित्याद्यनुवर्त्ततेतथाचाव्यभिचारपदार्थोनानुमितिजनकतावच्छेदकविषयत्वाश्रयइत्य
र्थः ॥ अव्यभिचरितत्वपदार्थविषयतानानुमितिजनकतावच्छेदिकेनियावत् ॥ नत्वेनतथात्वेमा
नाभावादितिशेषः ॥ ननुसाध्याभाववदवृत्तित्वादिविषयतात्वेननतथात्वंस्यादित्यताह ॥ तद्वि

सामान्ये

ति॥ केवलान्वयिनि तत्साध्यकेऽभावात्॥ साध्याभावाप्रसिद्धेः॥ तथा च तद्विषयतायाः अप्रसिध्येव तादृशावच्छेदकत्वं दुर्घटमिति भावः एवमुत्तरत्रापि बोध्यं॥ कपीति॥ कपिसंयोगसाध्यकसद्धेतुमात्रेद्रित्यर्थः इदं च अव्याप्तिं साध्यक इति पदं च॥ सामान्यतः साध्यतावच्छेदकावच्छिन्नप्रतियोगिताकाभावनिवेशाने समवायेन वह्न्यभावमादाय संयोगेन घटाभावमादाय चाव्याप्तिरत आह॥ येनेति॥ रूपपदं च धर्मविधया विशेषणावच्छेदकत्वलाभाय॥ अन्यथा समवायिनः समवायेन साध्यतायां घटत्वादौ संयोगिनः समवायेनाभावमादायाव्याप्त्यापत्तेः तत्प्रतियोगितायां संबंधविधया समवायावच्छेद्यत्वसमवायरूपसाध्यतावच्छेदकधर्मावच्छेद्यत्वोभयसत्वात्॥ एवं संबंधपदं संबंधविधया विलक्षणावच्छेदकत्वलाभाय॥ अन्यथा संयोगिनः संयोगेन साध्यतायां द्रव्यादिहेतौ समवायसंबंधेन संयोग्यभावमादायाव्याप्तेः॥ तत्प्रतियोगितायां धर्म

५ले

राम

४

विधया संयोगाद्यवच्छेद्यत्वसंयोगरूपसाध्यतावच्छेदकसंबंधनिष्ठावच्छेदकताकत्वोभयसत्वात्
इति अत्र समवायिनः संयोग्येन साध्यत्वे एतत्वादिहेतौ समवायावच्छिन्नसंयोगाभावमादायाप्तिः
साध्यतावच्छेदकधर्मावच्छिन्नत्वसाध्यतावच्छेदकसंबंधावच्छिन्नत्वयोः प्रतियोगितायां च सत्ता
त्‌॥ तद्वारणं च रूपसंबंधद्वयोरन्यतरनिवेशेपीति पृथक्‌ तन्निवेशप्रयोजनं दर्शितं॥ केचित्तु॥
महानसीयवन्ह्यभावादेर्वारणाय च साध्यतावच्छेदकरूपावच्छिन्नत्वसाध्यतावच्छेदकेतरधर्मा
नवच्छिन्नत्वरूपं निवेश्यं॥ नदितरत्वं च स्वानवच्छिन्नप्रकारतावच्छेदकत्वं॥ नेन संयोगादिसंबंधेन
प्रमेयवत्साध्यके न तदप्रसिद्धिः॥ संयोगेन वन्ह्यभावसंग्रहाय द्वितीयधर्मपदं॥ प्रकारतावच्छे
दकताघटकसंबंधावच्छिन्नत्वनिवेशास्फोरकं वा॥ न च सामान्यतः साध्यतावच्छेदकेतरानव
च्छिन्नप्रतियोगिताकाभाव एव निवेश्यः॥ तथासति समवायेन वन्ह्यभावादेः वारणेन साध्यता

वच्छेदकसंबंधावच्छिन्नत्वानिवेशेनलाघवमितिवाच्यं॥ संयोगिनः कालिकसंबंधेन साध्यता
यां कालत्वादिसद्धेतौ संयोगिनः संयोगेनाभावमादाया व्याप्तेः तत्संबंधावच्छिन्नत्वस्यावश्य
कत्वात्॥ धर्मसंबंधसाधारणावच्छेदकतायां प्रमाणाभावाच्च॥ अथैवमपि समवायकालि
कविशेषणताभ्यां क्रमेण घटानुयोगिकसंयोगवन्हित्वयोः साध्यतावच्छेदकत्वे घटत्वादाव्या
प्तेः॥ घटसंयुक्तस्य समवायेन वन्हित्वविशिष्टस्याभावस्य निर्वन्हिघटे सत्वात्॥ स्वसामाना
धिकरण्यत्वानवच्छेदकसंबंधावच्छिन्नत्वेन उभयसंबंधेन तत्तत्साधनावच्छेदकताविशिष्टतत्त
दवच्छेदकत्वानिरूपितत्वस्य प्रतियोगिताविशेषणत्वे गौरवं॥ तत्तत्साध्यतावच्छेदकतावि
शिष्टावच्छेदकत्वानिरूपकप्रकारतावच्छेदकताविशिष्टावच्छेदकत्वानिरूपकत्वकूटवत्प्रतियोगि
ताकत्वं निवेश्यं॥ वैशिष्ट्यं च स्वसमानाधिकरणत्वस्वावच्छेदकसंबंधावच्छिन्नत्वोभयसंबंधेन॥

राम
५

दर्शितसाध्याभाववारणाय प्रकृतसाध्याभावसंग्रहाय च क्रमेण वैशिष्ट्यद्वयोर्निवेशः॥ कूटनिवेशा
समवायेनैव वह्नित्वघटसंयोगोभयविशिष्टस्याभावनिरासः॥ निरवच्छिन्नैकधर्मावच्छिन्नसाध्यके तु
साध्यतावच्छेदकधर्मानवच्छिन्नप्रकारतावच्छेदकधर्मानवच्छिन्नप्रतियोगिताकत्वं तत्र निरवच्छिन्नसा
ध्यतावच्छेदकधर्मानवच्छिन्नेत्यादिनिवेशान्महानसीयत्वविशिष्टवह्नित्वावच्छिन्नाभावनिरासः॥
धर्मविधयाऽवच्छेदकत्वे च किञ्चिदवच्छिन्नत्वनिवेशाद्वह्निसामान्याभावादिसंग्रहः॥ वह्न्यादौ सा
मानाधिकरण्यादिसंबन्धेन महानसत्वादिकं स्वरूपतो न भासते समवायेनाभावात्॥ इति महान
सवह्न्यभावादिकमादाय न दोषः॥ तार्णाद्यभाववारणाय पृथक् साध्यतावच्छेदकधर्मावच्छिन्नत्व
घटकगौरवात्॥ अत्रेदम
मप्यावश्यकं॥ तार्णवह्न्याद्यभावादेस्तु वह्नित्वेन प्रतियोगितावच्छेदकत्वान्यधर्मविधयाऽवच्छेदकत्वान्निरू
त्वं॥ निरवच्छिन्नसाध्यतावच्छेदकनिष्ठधर्मविधयाऽवच्छेदकत्वा

अ॰टी॰

रू॰

पकत्वनिवेशो युक्तः ॥ प्रकारताद्यनिवेशेन लाघवात् ॥ न चैवमपि कालिकसंबंधेन वन्हित्वविशि-
ष्टस्य संयोगेन साध्यत्वे शैवालादिहेतौ समवायेन वन्हित्वविशिष्टस्य संयोगेनाभावमादाया व्या-
प्तिरितिवाच्यं ॥ साध्यतावच्छेदकताघटकसंबंधेन साध्यतावच्छेदकनिष्ठावच्छेदकतायाः विशेषणी
यत्वात् ॥ पूर्वकल्पे एतद्दोषवारणाय प्रमीयमानवच्छिन्नत्वघटकावच्छेदकतायाः उक्तसंबंधेन वि-
शेषणीयतया तत्रैव कालिकसंबंधेन वन्हित्वविशिष्टस्य योऽभावस्तस्य लक्षणघटकत्वप्रसं-
गः ॥ तत्प्रतियोगितायाः समवायेन तादृशप्रकारतावच्छेदकतापन्नवन्हित्वावच्छिन्नत्वादिति ॥
येन संबंधेन प्रकारतावच्छेदकत्वं तेन संबंधेन अवच्छेदकत्वानिरूपकत्वस्य वाच्यतायामहागौ-
रवाच्च ॥ यदि चैवं वन्हित्वव त्वान्नित्यादौ भिन्नलक्षणं न सद्यते तदोक्तकल्पयोः साध्यताव-
च्छेदकता सजातीयावच्छेदकतैव निवेश्या ॥ साजात्यं च निरवच्छिन्नत्वसाध्यतावच्छेदकतावच्छेदक-

राम
६

मात्रावच्छिन्नत्वान्यतररूपेण॥ यत्तु निरवच्छिन्नत्वं येन रूपेण साध्यतावच्छेदकताधर्मपर्याप्तिः
तद्रूपानवच्छिन्नत्वावच्छिन्नत्वोभयाभाववत्वं तेन विशेषिताविशेषितसाध्यतावच्छेदके सर्वमेव ल
क्षणं एतेन साध्यतावच्छेदकधर्मेतरानवच्छिन्नत्वे सति निरवच्छिन्नसाध्यतावच्छेदकावच्छिन्नत्वं प्र
तियोगिताविशेषणं तेन महानसीयवन्ह्यभाव महानसीयत्वविशिष्टवन्हित्वावच्छिन्नाभावयोर्व्यु
दासइत्यपास्तं॥ सविशेषितसाध्यतावच्छेदकेऽपृथक् लक्षणप्रसंगादिति॥ तन्न॥ वन्हेः साध्य
त्वे वन्हित्ववदभावस्य वन्हित्ववतः साध्यत्वे वन्ह्यभावस्य लक्षणाघटकतापत्तेरित्याहुः॥ वस्तुतस्तु
धर्मविधयाऽवच्छेदकतापि विलक्षणैव निवेश्या तेनाविशिष्टसाध्यतावच्छेदके तन्मात्रवृत्तेस्त
स्या एव निरवच्छिन्नाया लाभात्॥ महानसीयवन्ह्यभावमहानसीयत्वविशिष्टवन्हित्वावच्छि
न्नाभावयोर्व्युदासः॥ उभयधर्मावच्छिन्नसाध्यके साध्यतावच्छेदकताया घटसंबंधावच्छिन्ना

13

तत्र तत्संबंधावच्छिन्नयोः तत्समानाधिकरणयोरेव वैलक्षण्यमिति न कोपि दोषः ॥ विशिष्टसाध्यतावच्छेदकं केतु साध्यतावच्छेदकताया ऊर्मावच्छिन्नापीति सारं ॥ किंचित्तु ॥ साध्यतावच्छेदकनिष्ठत्वं तत्पर्याप्तत्वं ॥ तेन प्रमेयवत्साधके स्वरूपतो भासमानाधिकरणताविशेषवदभावमादाय नाव्याप्तिः ॥ साध्यतावच्छेदकं यत्र यादृशं विशिष्टं अविशिष्टं वा तत्र तादृशमुपादेयं ॥ भवन्मतेपि साध्यतावच्छेदकधर्मेतरधर्मावच्छिन्ने तत्र पर्याप्तिनिवेशादेव महानसीयवन्ह्यभाववारणाय पर्याप्तिशावकूय कीत्याह ॥ अत्रेदं परमरहस्यमाकलयामः ॥ येन रूपेण साध्यतावच्छेदकताघटकसंबंधता पर्याप्तिस्तद्रूपावच्छिन्ना तादृशसंबंधावच्छिन्नत्वं कुचित्निवेश्यं ॥ अन्यथा महानसीयवन्ह्यनुयोगिकसमवायेवन्हित्वविशिष्टस्याभावमादायाव्याप्तेः ॥ कालिकसमवायाभ्यां धूमत्वविशिष्टस्य साध्यत्वे वन्हौ कालिकेन धूमत्वविशिष्टस्याभावमादा

राम
७

यातिव्याप्तिस्तदुक्तमितितु न समवायेन धूमत्वविशिष्टाभावकालिके न धूमत्वविशिष्टाभावयोर
नुगतरूपेण निवेशो न तद्द्वारसंभवात् ॥ एवं प्रतियोगितायामपि येन रूपेण साध्यतावच्छेदकसं
बंधतापर्याप्तिस्तद्रूपावच्छिन्नतादृशसंबंधावच्छिन्नत्वं क्वचिद्बोध्यं ॥ तेन संयोगकालिकसंबं
धाभ्यां धूमस्य साध्यत्वे महानसानुयोगिकसंयोगेन पूर्वक्षणोत्पत्तिकत्वविशिष्टसंयोगेन वन्ह्य
भावमादाय नाव्याप्तिः ॥ एवं च कालिकसंयोगाद्युभयसंबंधेन साध्यतायां सद्धेतावुभयसंबं
धावच्छिन्नसाध्याभावोपगमादेवल्लक्षणसमन्वयः ॥ वस्तुतो विशेषरूपेणासंबंधत्वानुपग
मात् ॥ तदुपगमेपि यत्र विशिष्टोऽविशिष्टेवायः संबंधस्तस्य साध्यतावच्छेदकसंबंधादिशा
रेणोपादानात्तदवच्छिन्नत्वमात्रं सम्यक् ॥ साध्याभावाधिकरणत्वं साध्याभाववत्त्वविशिष्टा
धिकरणत्वं ॥ तेन द्रव्यान्यत्वविशिष्टसत्ताभाववान् द्रव्यत्वादित्यादौ नाव्याप्तिः ॥ धूमा

भावत्वान् वन्ह्यभावादित्यादौ साध्याभावत्वावच्छिन्नाधिकरणतांगीकारान्न दोषः॥ साध्याभा
वत्वं साध्यतावच्छेदकसंबंधेन साध्यताग्रहविरोधितानियामकसंबंधेन तेन कालिकसंबंधा
वच्छिन्नाकाशाभावाभाववान् आत्मत्वादित्यादौ साध्याभावस्याकाशाभावात्मनोऽधिकरणे
हेतोऽसत्वेपि नाव्याप्तिः। कालिकसंबंधावच्छिन्नाधिकरणताया नियामकत्वोपगमेनैव कालि
कसंबंधावच्छिन्नाकाशाभावाभावो नास्तीति प्रत्ययापत्तिवारणसंभवेन तत्र साध्याभावत्वाव
च्छिन्नातिरिक्ताधिकरणत्वानुपगमात्॥ अभावाभावस्यातिरिक्तत्वापक्षेपि विशिष्टाधिकरणत्वानिवे
शोप्यधिकरणे साध्याभावस्य निरुक्तसंबंधो निवेश्य एव॥ स्वरूपसंबंधनिवेशोन्ततीयाभावस्य
प्रथमाभावरूपतया एतद्व्याप्तेर्दुर्वारत्वात्॥ एवं च धर्माभावादिसाध्यकेऽतिरिक्ताधिकर
णत्वामंगीकारेपि न क्षतिः॥ एवं चैवाधिकरणपदार्थनिवेशापक्षेऽधिकरणेऽधिकरणत्वस्य स्वरू

पसंबंधोनिवेश्यः॥ अन्यथावह्निमान्धूमादित्यादौपर्वतादौकालिकेनतादृशसाध्याभावा
धिकरणत्वस्यसत्वादव्याप्तिर्न्नियाःस्वरूपसंबंधावच्छिन्नतदधिकरणत्वप्रवाहनिवेशापातात्॥
अथनिर्धूमवृत्तित्वघटोभयाभावस्यपार्थिवत्वादिविशिष्टनिर्धूमत्वाभावस्यचकथंवारणंतादृश
वृत्तित्वत्वेतरधर्मानवच्छिन्नत्वोक्त्येतिचेन्नपार्थिवत्वादिवैशिष्ट्यविशिष्टनिर्धूमवृत्तित्वत्वावच्छि
न्नाभावावारणात्इतिचेन्न॥ साध्याभाववद्वृत्तित्वनिष्ठनिरवच्छिन्नावच्छेदकताकत्वानिरूपि
तप्रतियोगिताकाभावनिवेशात्॥ वस्तुतउभयाभावविशिष्टाभावव्यावृत्तेनसाध्याभाववद्वृत्ति
त्वंनास्तीतिप्रतीतिसिद्धतादृशवृत्तित्वाभावनिवेशः॥ साध्याभाववद्वृत्तित्वत्वावच्छिन्नाभाव
निवेशाद्इतितुनव्याः॥ तद्वत्वंचस्वरूपसंबंधेन॥ तेनकालिकसंबंधधूमादायव्यभिचारिणिना
तिव्याप्तिः॥ ननुविपक्षवृत्तित्वंनसंबंधसामान्येनधूमादौकालिकसंबंधेननिर्वह्निवृत्तित्व

17

सत्वेनाव्याप्तेः॥ नापि यत्किंचित्संबंधेन वन्ह्यादौ निर्धूमसमवेतत्वाभाववत्त्वेनातिव्याप्तेः॥ नापि
हेतुतावच्छेदकसंबंधेन सत्तावान् द्रव्यत्वादित्यादौ साध्याभाववत्समवेतत्वाप्रसिद्धेः॥ नापि
हेतुतावच्छेदकस्वरूपसंबंधान्यतरसंबंधेन॥ आत्मभिन्नः कालिकसंबंधेन घटाभावादित्या
दावव्याप्तेरितिचेन्न॥ हेतुतावच्छेदकसंबंधेन हेतुतावच्छेदकविशिष्टाधिकरणतानिरूपितवृत्ति
त्वीयस्वरूपसंबंधावच्छिन्नप्रतियोगिताकतादृशवृत्तिताभावनिवेशात्॥ हेतुतावच्छेदकसं
बंधावच्छिन्नवृत्तित्वीयस्वरूपसंबंधावच्छिन्नप्रतियोगिताकत्वमात्रनिवेशे सत्तावान्कालि
कसमवायोभयसंबंधेन द्रव्यत्वादित्यादौ अव्याप्तिरतो निरूपितत्वांतं॥ न च तथापि कालिक
संबंधेन द्रव्यत्वाधिकरणध्वंसीयकालिकसंबंधावच्छिन्नवृत्तित्वमादायाऽव्याप्तितादवस्थ्यं॥ हेतुतावच्छेदकसंबंधतावच्छेदकरूपेण संबंधनिवेशात्॥ हेतुतावच्छेदकविशिष्ट

राम
९

त्वोपादानाद्द्रव्यं विशिष्टसत्वादित्यादौ नाव्याप्तिः ॥ विशिष्टहेत्वधिकरणतानिरूपितहेतुतावच्छेद
क संबंधावच्छिन्नवृत्तित्वीयस्वरूपसंबंधावच्छिन्नप्रतियोगिताकत्वमन्ये निवेशयंति ॥ अत्र विशे
षरूपेण संसर्गत्वानुपगमे द्रव्यं विशिष्टसत्वादित्यौ अव्याप्तिः ॥ न च हेतुतावच्छेदकावच्छेदेन सा
ध्याभाववद्वृत्तित्वाभावो विवक्षणीयः ॥ सामानाधिकरण्यस्य आप्यघटितत्वात् ॥ हेतुतावच्छेदके सा
ध्याभाववद्वृत्तितावच्छेदकत्वमपि न सत्तात्वस्य तादृशावृत्तितावच्छेदकत्वे नाप्राप्तेः ॥ हेतुतावच्छेद
कौ सत्तात्वाप्रवेशेऽपि शुक्लेतररूपवान् ॥ शुक्लरूपवद्समवेतत्वे सति घटत्वादित्यादावव्या
प्तेः ॥ घटत्वत्वशुक्लरूपवदसमवेतत्वविशिष्टत्वयोः तादृशावृत्तितावच्छेदकत्वात् ॥ नापि हेतुताव
च्छेदकसंबंधसामान्ये साध्याभाववदनुयोगिकत्वप्रकृते हेतुप्रतियोगिकत्वोभयाभावः द्रव्यं गु
यादित्यादावव्याप्तेः ॥ समवायस्यैकत्वेन तत्र द्रव्यान्यानुयोगित्वगुणप्रतियोगिकत्वोभयसत्वात् ॥

सत्तावान् समवायकालिकविशेषणतोभयसंबंधेन द्रव्यत्वादित्यादावव्याप्तेः॥ एतेन हेतुप्रतियोगिकसं
बंधसामान्ये साध्याभाववदनुयोगिकत्वाभावः साध्याभाववदनुयोगिकसंबंधसामान्ये वा हेतुप्रति
योगिकत्वाभावः प्रत्युक्तः॥ स्वावयवानुयोगिकसमवायसंबंधमादाय वह्निमान् धूमादित्यादाव
व्याप्तेश्च॥ साध्याभाववद्वृत्तित्वे हेतुतावच्छेदकसंबंधान्यहेतुप्रतियोगिकसंबंधान्यसंबंधावच्छि
न्नत्वनिवेशे सत्तावान् समवायेन प्रमेयाद्विषयितातादात्म्यान्यतरसंबंधेन गगनाद्वा जातिभि
न्नः॥ कालिकेन प्रमेयादित्यादौ द्रव्यं विशिष्टसत्वादित्यादौ चाव्याप्तिरेवेति॥ तस्मात्स्वाधिकर
णावृत्तिसाध्याभाववत्त्वं दीधितिकृद्वक्ष्यति॥ नन्वत्रापि वन्ह्यभाववाद्धेतुमति कालिकसं
बंधेन सत्वादव्याप्तिः॥ दैशिकविशेषणतया तन्निवेशे च घटत्वाभाववान् प्रमेयत्वादित्या
दावतिव्याप्तिः॥ तस्याभावसाधारण्यमनाभावात्॥ कालिकसंबंधावच्छिन्नाकारगभावी

राम
९०

भावसाध्यकालत्वादावव्याप्तिश्च॥ अत एव न साध्यवतागृहविरोधिता नियामकसंबंधेन
हेतुमद्वृत्तित्वनिवेशः॥ कालिकसंबंधेनात्मवृत्तित्वाप्रसिद्धेः॥ एवं सत्ताभाववान् जात्यभावादि
त्यादौ तादृशसमवायेन हेतुमद्वृत्तित्वाप्रसिद्धेः॥ द्रव्यान्यत्वविशिष्टसत्ताभाववान् द्रव्यत्वादि
त्यादावव्याप्तिश्चेति चेन्न॥ साध्यवतागृहविरोधितानियामकासंबंधेन साध्याभावत्वविशिष्टा
धिकरणत्वे हेतुतावच्छेदकसंबंधेन प्रकृतहेतुमन्निरूपितस्वरूपसंबंधावच्छिन्नवृत्तित्वाभाववस्य
वाच्यत्वात्॥ हेतुतावच्छेदकसंबंधेन विशिष्टहेत्वाधिकरणत्वे साध्याभाववन्निरूपितस्वरूपसं
बंधावच्छिन्नवृत्तित्वाभाववत्त्वं तु तर्कालंकारानुयायिनो वदंति॥ हेत्वधिकरणतासामान्यवि
वक्षाया अतिव्याप्तिवारणायावश्यकत्वे तत्र हेतुतावच्छेदकत्व[illegible]यात्किंचित्संबंधनिवेशाद्दुभ
यसंबंधेनोक्तहेतौ लक्षणागमनादिति॥ दीधितौ सद्भुतावितिः॥ विशेष्यत्वं सप्तम्यर्थः॥
अन्यतरतेनावशिष्टलक्षणत्वसंबं
धत्वाभावान्नातिव्याप्त्यव्याप्तिरिति ९

अव्याप्तिर्लक्षणासत्वं ॥ अन्यथा कपिसंयोगसाध्यकव्यभिचारिण्यव्याप्त्यभावादसंगतेः ॥ आ
शंकासद्भावः ॥ उत्तरकालीनत्वं तत्कार्थः ॥ कथनं धात्वर्थः ॥ अवच्छेदकावच्छेदेन चाव्याप्तिरन्वयः ॥ त
थाच तादृशसंदेहत्वावच्छेदेन लक्षणासत्वसंशयोत्तरकालीनकथनानुकूलकृतिमान् मणिकार
इति बोधः ॥ अत्र निरवच्छिन्नविशेषणतासंबंधेन साध्याभाववत्तानिश्चयस्य प्रतिबंधकत्वे तादृश
संबंध एव साध्यवत्ताग्रहविरोधितानियामक इति नाव्याप्तिः ॥ अव्याप्यवृत्तित्वज्ञानानास्कंदि
नस्य शुद्धविशेषणतासंबंधेन साध्याभाववत्तानिश्चयस्य तथात्वेऽव्याप्तिरिति संशयो बो
ध्यः ॥ अथात्र साध्यतावच्छेदकावच्छिन्नाभावो विवक्षितः तत्र साध्यतावच्छेदकत्वेन धर्मानुपग
मेन तस्य केवलान्वयितया जगत देव तद्विशिष्टावच्छिन्नवत्वात् तदप्रसिद्धिः ॥ साध्यता घटकेम
समवायेन वा तद्विशिष्टावच्छिन्नवत्सत्तावदेवस्यादतो विशिष्टेके कंसातावच्छेदकमुपा

राम ११

दायलक्षणं कर्त्तव्यं तत्र च लक्षणभेदः स्यात्॥ तथा च कपिसंयोग्येतत्त्वादित्यादौ कथमव्याप्तिः वि
शिष्य कपिसंयोगत्वस्य साध्यतावच्छेदकं निरुक्तलक्षणस्यैवासत्वात्॥ सत्यं॥ साध्याभाववदवृ
त्तित्वघटको नानार्थः तत्र कपिसंयोगत्वं निवेश्यापि यस्तदर्थो गगनादौ प्रसिद्धः॥ स उक्तस्थले ना
स्तीत्यर्थात्॥ अन्ये तु साध्यतावच्छेदकं प्रकृतामितिविधेयतावच्छेदकं वह्नित्वादि॥ प्रकृतत्वं प्राचा
मतेऽनुगतविशेषविश्रान्तं स्वत्वं तत्॥ तथ च प्रकृतानुमितिविधेयतावच्छेदकत्वोपलक्षितधर्माव
च्छिन्नाभावलक्षणस्याव्याप्तिरित्यर्थः॥ न चाभावप्रतियोगितावच्छेदककोटावुपलक्षणस्य
न भानामिति वाच्यं॥ अभावप्रतियोगितावच्छेदके साध्यतावच्छेदकत्वं न निविश्यते किंतु साध्य
तावच्छेदक [illegible] निष्ठाभावप्रतियोगितावच्छेदकतायां सामानाधिकरण्यसंबंधेन तद्वत्त्वमित्यदो
षात्॥ न चैवमपि साध्यतावच्छेदकतायाः साध्याभावप्रतियोगितानवच्छेदकत्वेपि वृत्तित्वाभाव

प्रतियोगितावच्छेदकतया तत्रोपलक्षणस्य साध्यतावच्छेदकत्वस्य कथं निवेश इति वाच्यं ॥ सा
मानाधिकरण्यघटितसामानाधिकरण्यसंबंधेन साध्यतावच्छेदकनिष्ठप्रतियोगितावच्छेदक
तानिष्ठावच्छेदकतायां साध्यतावच्छेदकत्ववत्त्वनिवेशे यत्तन्निरूपितप्रतियोगित्वनिष्ठावच्छेदक
तानिरूपिताभावनिष्ठावच्छेदकतानिरूपिताधिकरणनिष्ठावच्छेदकतानिरूपितवृत्तित्वसामान्याव
च्छिन्नप्रतियोगिताकाभावस्य विवक्षितत्वात् ॥ तत्र च कपिसंयोग्येतत्त्वादित्यादावव्याप्तिः ॥ न चैवं द्रव्य
त्वाभाववद्वृत्तित्वसत्त्वान्नाव्याप्तिरिति वाच्यं ॥ अनुमितौ साध्यतावच्छेदकस्य यादृशी विषयताप
रामर्शे तस्य तस्य तादृशी विषयतैव तन्नियामिका इति नियमात् कपिसंयोगत्वावच्छिन्नसाध्यके तद
वच्छिन्नाभाववद्वृत्तित्वाभावाव्याप्तेर्दुर्वारत्वात् ॥ अत्र च वह्नित्वादिरूपसाध्यतावच्छेदकस्य स्वरू
पताप्रवेशः ॥ साध्यतावच्छेदकत्वस्योपलक्षणत्वाच्च न परामर्शानुमित्योस्तज्ज्ञानमित्याहुः ॥

१ ववहृत्तित्वपरामर्शस्यभ्रमत्वापत्तिरेवाव्याप्तिः॥ नचसाध्याभाववत्तायांनिरवछिन्नत्वदानान्नाव्याप्तिरितिवाच्यं॥ संयोगिमि १

वस्तुतस्तु अव्याप्यवृत्तिसाध्यकसद्धेतौसाध्याभावोन्नं गुणत्वादित्यादौसाध्याभावस्यसंयोगरूप
त्वेनिरवछिन्नाधिकरणत्वाप्रसिद्धेः॥ प्रकाशिकायांआकाशादीति॥ कपिसंयोगीगगनादित्यादेर्लक्ष्य
त्वमभिप्रेत्य॥ अव्याप्यवृत्तिसाध्यंयस्यसोऽव्याप्यवृत्तिसाध्यकः तादृशश्चासौसद्धेतुश्चेतिविग्रहा
दव्याप्यवृत्तिसाध्यकसद्धेतुत्वावछेदेनाव्याप्तिरित्यर्थः॥ उत्सर्गः॥ अवछेदकावछेदेनैवाचयात्॥ सच
सद्धेतुत्वप्रवेशेऽसंगतः उक्तस्थलेऽव्याप्यभावादित्यर्थः॥ वृत्तिमदिति॥ तथाचतादृशवृत्तिमद्धेतुत्वाव
छेदेनाव्याप्तिरितिनियमोनासंगतइतिभावः॥ नचेवमपिकपिसंयोगाभाववान्गुणत्वादित्यादौ
क्षितिपाथःसंयोगाभाववान् तेजोवायुसंयोगादित्यादौआत्मत्वतदन्याधिकरणसंयोगान्यतरसा
ध्यकात्मत्वादौगुणसाध्यकजलपरमाणुरूपादौचलक्षणगमनादसंगतिः॥ एतेनाव्याप्यवृत्ति
मद्धेतुत्वावछेदेनेत्युक्तौहेतौसत्तावत्वनिवेशोपिचननिस्तारः॥ अत्रकेचित्॥ अव्याप्यवृत्ति

साध्यं यत्र तदव्याप्यवृत्ति साध्यकमधिकरणं तत्र सन् वर्त्तमान इत्यर्थः ॥ नन्वेवं सत्पदं द्विमर्थं सप्त
स्येव वृत्तित्वलाभेन कपिसंयोगी साध्यकगगनादिहेतावदोषादिति वाच्यं ॥ तादृशार्थलाभायैव सत्य
दोषादानादित्यादेः ॥ तदसत् ॥ तथाप्यवतारणासंगतेः ॥ संयोगी सत्वादित्यादौ साध्यनिष्ठाव्या
प्यवृत्तितानिरूपकाधिकरणवृत्तिमद्धेतोसत्त्वापंसाध्याभाववदवृत्तित्वरूपलक्षणाभावात् कवि
धेयसत्वेपि उत्तरलक्षणासत्वात् ॥ न च हेतुपदं व्याप्तिमत्परं ॥ व्याप्तिश्च स्वव्यापकसाध्यवदवृत्ति
त्वं ॥ तथा चोक्तस्थले तादृशव्याप्तिमद्धेतुत्वरूपोद्देश्यतावच्छेदकाभावादेवनावतारणासंगतिरिति
वाच्यं ॥ तथापि कपिसंयोगाभाववान् द्रव्यत्वादित्यादेरुद्देश्यतावच्छेदकविधेयवतः साध्यवदृ
त्तप्रसिद्ध्या उत्तरलक्षणाभावात्तदसंगतेर्दुर्वारत्वात् ॥ एतेनाव्याप्यवृत्तित्वं हेत्वधिकरणेऽवच्छि
न्नवृत्तिकत्वमिति प्रत्युक्तं ॥ गुणवान् जलपरमाणुरूपादित्यादौ संयोगादेः सत्वे न दोषानुद्धाराच्च ॥

राम
३२

वस्तुतस्तु व्याप्तिमल निवेशे वृत्तिमत्ववैयर्थ्यमुक्तरलक्षणे नियमभंग एव तात्पर्यं ॥ तथाच संयो
गीसत्वादित्यादावुक्तरलक्षणाव्याप्तावपिनक्षतिः ॥ साध्यवाख्यव्यापकत्वलाभार्थं हेतुपदं ॥ नचैव
मपि ज्ञानवानीश्वरत्वादित्यादावव्याप्त्यभाव इतिवाच्यं ॥ सप्तमीतत्पुरुषोपगमात् ॥ नच्चैवमपि ई
श्वरत्वं नित्यज्ञानमेव ॥ अव्याप्यवृत्तित्वविशिष्टज्ञानवतिजीवे विषयतासंबंधेन वन्हेर्मानोऽव्याप्य
भाव एवेतिवाच्यं ॥ हेतुतावच्छेदकसंबंधावच्छिन्नवृत्तिमत्वस्योक्तत्वात् ॥ एतदर्थमेव सत्पदमिति
ननु हेतुयर्थ्यं ॥ अव्याप्यवृत्तित्वंच स्वावच्छिन्नाभाववद्वृत्तितावच्छेदकसाध्यतावच्छेदकवत्वं ॥ तेन घट
त्वत्वद्वृत्तिसंयोगान्यतरसाध्यके घटत्वादौ न नियमभंगः ॥ कपिसंयोगाभावादि साध्यकद्रव्य
त्वादेर्वारणीयत्वेतु साध्येऽन्योन्याभावप्रतियोगितावच्छेदकत्वं ॥ यत्तु संयोगी द्रव्यत्वादित्यादौ
नाव्याप्तिः ॥ प्राचीनैर्द्रव्यसंयोगाभावानंगीकारादिति ॥ तन्न ॥ तन्मते तस्याऽव्याप्यवृत्तित्वासंभ

वस्यवक्ष्यमानत्वात्॥ अन्येतुअव्याप्यवृत्तित्वविशिष्टकेवलान्वयिभिन्नसाध्याधिकरणवृत्तिमद्धे
तुतावच्छेदकावच्छेदेनेत्यर्थः॥ अत्रकेवलान्वयिभिन्नत्वंचात्यंताभावप्रतियोगित्वं किंतुप्रतियोग्यनधिक
रणवृत्त्यंताभावप्रतियोगित्वं सत्सद्दोपादानात्॥ घटत्वतद्व्याधिकरणसंयोगान्यतरसाध्यकघटत्वादि
वारणायाधिकरणपदमित्याहुः॥ व्याप्यवृत्तित्वंनिरवच्छिन्नवृत्तिकत्वं॥ तथाचनव्याप्यवृत्तिरव्याप्य
वृत्तिरिति व्युत्पत्त्या निरवच्छिन्नवृत्तिकान्यसाध्यकव्याप्तिमद्धेतावित्यर्थः॥ कपिसंयोगाभावादे
र्गुणेनिरवच्छिन्नवृत्तिकतयाऽव्याप्यवृत्तित्वाभावान्नतद्वत्वोक्तादृशोद्देश्यतावच्छेदकाक्रांतत्वं॥ ए
वंचाव्याप्यवृत्तिसाध्यकसद्धेतुपदयोः कर्मधारयएवलाघवात्॥ सत्पदंवृत्तिमत्परंदव्याप्ति
मत्परं॥ तस्याऽस्वघटितत्वालाभायहेतुपदं॥ नचगगनादेर्निरवच्छिन्नवृत्तिकान्यत्वरूपाव्या
प्यवृत्तित्वेतत्रत्यहेतौपरलक्षणाभावादसंगतिरितिवाच्यं॥ तादृशसाध्यकत्वस्यतादृशसा

ध्यसामानाधिकरण्यरूपत्वादित्यपि वदंति॥ परे तु अव्याप्यवृत्तित्वं इह स्वसमानाधिकरणभेदप्रति
योगितावच्छेदकत्वस्वसमानाधिकरणत्वस्वप्रतियोगित्वैतत्त्रितयसंबंधेन यत्किंचिदभावविशि
ष्टत्वं॥ प्रथमसंबंधनिवेशात्कपिसंयोगाभावव्युदासः तत्र चरमसंबंधरूपेण संयोगात्मकाभाव
विशिष्टत्वेपि संयोगाभाववद्भेदाप्रसिद्ध्या प्रथमसंबंधाभावात्॥ न च नव्यमते तादृशभेदः प्रसिद्ध
स्तन्मते भेदप्रतियोगितायाः केवलान्वयिधर्मानवच्छिन्नत्वेन विशेषणीयत्वात्॥ भेदविशेषणत्वे
स्वसमानाधिकरणत्वं निरवच्छिन्नत्वं वा निवेश्य द्वितीयसंबंधनिवेशात्स्वाभावमादाय तृतीयसंब
धनिवेशाद्गगनाभावमादाय पृथिवीत्वहेतुकद्रव्यत्वस्य नाव्याप्यवृत्तित्वे संयोगी द्रव्यत्वादित्या
दौ प्राचां मते संयोगाभावादेर्नाव्याप्यवृत्तित्वं स्याभावासामानाधिकरण्यात्॥ कपिसंयोगादेस्तु
तथात्वमिति तत्साध्यकत्वादिसंग्रहः॥ एतेन विषयतासंबंधेन सर्वं प्रमेयमित्याकारक

५ कपिसंयोगादेः कपोव्याप्यवृत्तित्वमतस्तद्व्यः ॥ ५

यत्किंचिज्जन्यज्ञानव्यक्तेस्तद्विषयताव्यक्तेर्वा साध्यतायां घटत्वादौ निरवच्छिन्नवृत्तिकान्यत्वघ
टितोद्देश्यतावच्छेदकत्वव्याप्तेः परलक्षणेन दुर्वारत्वाद संगतिरित्यपास्तं ॥ तत्र साध्यवद्भेदस्यालीक
त्वादित्याहुः ॥ अव्याप्यवृत्तित्वं स्वाधिकरणेषु यावत्स्वावच्छिन्नवृत्तिकत्वं ॥ तेन कपिसंयोगाभावघटत्व
तद्व्यधिकरणसंयोगान्यतरादिसाध्यक व्युदासः ॥ अवच्छेदकायोग्यकालावृत्तित्वं देयं ॥ तेनोक्तम
न्यज्ञानसाध्यकव्युदासइत्यप्याहुः ॥ अपरेतु अव्याप्यवृत्तित्वं दैशिकाव्याप्यवृत्तित्वं ॥ तथाच देश
वृत्त्यवच्छेदकत्वानिरूपकवृत्तिविशिष्टसाध्याधिकरणवृत्तिसद्धेतावित्यर्थः ॥ जगदीशमते एकं
ज्ञानविषयत्वादेः संबंधतयातादृशसाध्याधिकरणविशिष्टहेतावित्यर्थः स्यात् ॥ अतः सत्संद॥
सत्वअव्याप्यवृत्तितानिरूपकाधिकरणोतभावेवाव्याप्यत्वमित्याहुः ॥ वस्तुतस्तु स्वसमानाधि
करणाभावप्रतियोगिसाध्यकसद्धेतावित्यर्थः ॥ स्वंहेतुः ॥ अभावोभावभिन्नः ॥ स्वसामाना

राम
१५

धिकरण्ये च कालानवच्छिन्नत्वं देयमिति कृतबुद्धयो विद्वांसः कुर्वंतु ॥ ननु कपिसंयोगी एतद्वृक्षत्वा
दित्यादौ कथमव्याप्तिः गुरुधर्मावच्छिन्नसाध्यके लक्षणासंगमनार्थं साध्यव्यापकतावच्छेदकरूपा
वच्छिन्नाभावनिवेशनस्यावश्यकतया तथाविधद्रव्यत्वाभावसामान्यलक्षणगमनात् ॥ यत्तु साध्य
व्यापकतायाः साध्यतावच्छेदकसंबंधघटिततया वन्ह्यादिसाध्यकेऽभावप्रसिद्ध्यर्थं तत्र प्रतियो
गिवैयधिकरण्यं प्रवेश्यमिति कपिसंयोगाभावो न वार्यत इति तन्न ॥ विशेषणताविशेषसंबं
धेन व्यापकताया उक्तत्वात्प्रतियोगिवैयधिकरण्यस्य व्यर्थत्वादिति चेन्न ॥ एतल्लक्षणे पंचके गु
रुधर्मस्य प्रतियोगितावच्छेदकत्वोपगमात् ॥ अत एव पंचमे गुरुधर्मस्य तथात्वं कंठत एवो
क्तं ॥ परे तु साध्यतावच्छेदकावच्छिन्नाभावघटितस्यैव व्यभिचारपदार्थता केवलान्वयिन्य
भावादित्यत्र केवलान्वयिपदं गुरुधर्मावच्छिन्नसाध्यकोपलक्षणं ॥ निरवच्छिन्नवृत्तिमदत्यंता

न·टी·

सू·

भावप्रतियोगितानवच्छेदकसाध्यतावच्छेदकपरं वा॥ हेतुतावच्छेदकसंबंधानुयोगिरत्यभाव
प्रतियोगितानवच्छेदकपरं वा सत्तासाध्यकसद्धेतुसाधारणं हेतुतावच्छेदकसंबंधानुयोगिनिष्ठ
भेदप्रतियोगितावच्छेदकतानवच्छेदकसाध्यतावच्छेदकत्वं॥ संयोगाभावादिसाध्यकद्रव्य
त्वादिसाधारणमित्याहुः॥ तत्र साध्याभावाप्रसिद्धिनिबंधनाव्याप्तिरेवाभिधित्सिता
तस्यैवं चायेऽथेदमित्यादिना प्रसिद्धिकरणादिति तत्पाध्यायानुयायिनः॥ अधिकस्या
भेदेनाभावभेदानंगीकारात् लक्षणाविरहाच्च॥ लाघवेनकर्मधारयमाशंकते॥ नचेति॥
नवैयर्थ्यमिति॥ यथा सन्निवेशरूपप्रयोजनमभिप्रेत्यमतुबर्थ इति॥ मतुपदस्थाने
संबंधिपदं योजनीयं॥ तेन प्रकृतस्य सत्वान्मतुपोऽनुपपत्तिरितिमाशंक्य॥ व्यर्थतेति सन्निवे
शो विशेषणविशेष्यभावः॥ विशेष्यत्वं विशेषणत्वं चाघंतपदार्थौ विहायतदुभयसत्वेनैव

राम

३६

सत्त्वयोजनं लभ्यते॥ साध्याभावे च तदसत्वात्तद्वैयर्थ्यमित्यर्थः॥ न च साध्यवह्निनीयवृत्तित्वं ल
निष्ठावच्छेदकत्वाद्धि लक्षणे च साध्यवह्निनीयय त्साध्याभाववद्वृत्तित्वत्वनिष्ठावच्छेदकतागुरुध
र्मस्यावच्छेदकतानुपगमे तु साध्यवह्निन्नात्मकोयः संबंधी तेन न विरोधः ततः साध्यवह्निवृत्तित्व
त्वस्यैव लघुत्वादिति वाच्यं॥ अभावत्वकस्य स्वरूपसंबंधरूपावच्छेदकत्वकोट्यप्रविष्टत्वेन साध्या
भावात्तभावेच्छावच्छेदकतादुर्वचत्वात्॥ यत्तु लक्षणावच्छेदकत्वेपि वैयर्थ्यमेव॥ प्रकृतलक्षणघटक
स्य लक्षणत्वसंभवे शेष वैयर्थ्यमिति न्यायात्॥ प्रकृतलक्षणविषयिताव्यापकसंसर्गोक विषयि
त्वाघटितनिरूप्यनिरूपकभावापन्नयद्विषयितातस्य लक्षणत्वसंभवइत्यर्थादि॥ यत्तु साध्यव
ह्न्यदनिष्ठावच्छेदकता न्यसाध्याभाववन्निष्ठावच्छेदकत्वान्यावच्छेदकत्वानिरूपकसाध्यवह्न्यादावच्छि
न्नधर्मनिष्ठावच्छेदकताकोटौ अनिरूपकत्वात्तद्व्यर्थमिति॥ तदुभयमप्येतेन परास्तं॥ साध्यवह्नि

न्न साध्याभावइति असमर्थसमासः॥ अधिकरणकारकात्सप्तमी विधानादित्याशंक्याह॥ समर्थे
ति॥ समर्थेनेच समप्यधिकरणेचेतिसूत्रेचिचकारात्सप्तमी तदर्थो वृत्तित्वं विशेषणतयानान्वयः॥ तथा
सति साध्याभावपदवैयर्थ्यात्॥ गिरिःकावन्नंदिमिति वद्रूपलक्षणतया तत्त्वतस्य प्रतियोगितावे
छेदकत्वेप्यधिकरणतानवच्छेदकत्वया॥ यद्वा साध्यवद्भिन्नः साध्यवद्भेदस्य सामानाधिकरण्यसं
बन्धेनाश्रयः साध्याभावइति कर्मधारयो नसमर्थः॥ तादृशाश्रये क्तप्रत्ययानुशासनादन्यथा
घटोघटभिन्न इत्यपि प्रयोगः स्यादितितदुक्तं॥ सप्तमी समासं व्याचष्टे इति योजना॥ व्याचष्टे
वृणोति॥ तादृशेति समासतात्पर्यार्थप्रदर्शकं विग्रहतर्क इतियावत्॥ दीधितौ यदिति अभाव
भेदमतसत्वंक॥ वैयर्थ्यं॥ साध्याभावपदवैयर्थ्यं॥ आशयइति॥ अभावभेदानंगीकारात्लक्ष
णाविरहाच्च कर्मधारयएवयुक्तः॥ साध्यवद्भिन्नत्वं च प्रतियोगिमद्भिन्नत्वं घटाभावादिवा

राम
११

रणाय साध्यपदमिति तुच्छितत्वारंभापरित्यागोत्रास्वरसः॥ साध्यवद्भिन्नवृत्तित्वं संबंधसामान्ये
न प्रविष्टमित्याशयेन॥ द्रव्यत्वादिति॥ साध्यवताग्रहविरोधिग्रहविषयस्य संबंधेन प्रवेशे तु द्रव्य
त्वप्रकारकप्रमाविषयत्वादिसंग्राहकं आदिपदं॥ केचित्तु॥ साध्यवताग्रहविरोधिताघटकसंबंध
निवेशे द्रव्यत्वादिकमादाय घटत्वाभाववान् पटत्वादित्यादौ अव्याप्तिः अतोऽभावीयविशेषणता
संबंधेन वृत्तित्वं वाच्यं॥ तत्र च न काणनुपपत्तिः॥ अभावाभावस्यातिरिक्तत्वादित्याहुः॥ अभावाभा
वस्यातिरिक्तत्वेपि साध्यवताग्रहविरोधिताघटकत्वेनैव संबंधो निवेश्यः॥ ततश्च समवायादे
रपि लाभान्न साध्याभावपदं व्यर्थं॥ ननु अभावीयविशेषणतात्वेनेत्यपरासाध्यवद्भिन्नवृ
त्तित्वः साध्याभाववद्वृत्तितायां संबंधाविशेषानिवेशे वन्हिमान् धूमादित्यादौ कालिकादिसं
बंधमादायाव्याप्तिः॥ साध्यवताग्रहविरोधिताघटकसंबंधोक्तौ साध्यवद्भिन्नपदवैयर्थ्यं॥

शुद्धविशेषतासंबंधेनाव्याप्यवृत्तित्वज्ञानाभावविशिष्टसाध्याभाववत्ताज्ञानविरोधित्वानुपग
मात्॥ अतोभावीयविशेषणतासंबंधोनिवेश्यः साध्याभावीयविशेषणतासाध्याभावपदं विना
नोपपद्यत इति साध्याभावपदस्यार्थवत्त्वं॥ न च साध्यवद्भिन्नवृत्तित्वेऽभावीयविशेषणतासंबंधे
न तद्भानित्युच्यमाने साध्याभावपदं निरर्थकमिति वाच्यं॥ तस्य लक्षणांतरत्वादितीतरे अव्या
प्तिः गगनादेर्लक्ष्यत्वाभिप्रायेण। अन्यथा लक्ष्यसंभवो ननु गगनाद्यावृत्तिव्याप्तिस्तन्मते वृत्तिमत्त्व
निवेशात्॥ साध्याभाववतीति॥ गुरुधर्मस्य प्रतियोगितावच्छेदकत्वं आदरणीयं॥ अन्यथा लाघ
वेन तत्र साध्यवद्भिन्नवृत्तित्वमेव प्रतियोगितावच्छेदकं स्यात्तु साध्याभावघटितमित्यसंभ
वात्॥ साध्यवद्भिन्नवृत्तित्वस्य परिचारकतया प्रवेशादित्यन्ये॥ अभावभेदे॥ सप्तमपदार्थरूपा
भावमात्रभेदं॥ आश्रित्येवेति॥ विशिष्टाधिकरणतानिवेशे तु साध्याभावपदवैयर्थ्यमुक्तं॥

राम
१८

लक्षणमिति ॥ नह्ययं प्रथमलक्षणनिष्कर्षः अभावभेदवादिनामिदं लक्षणमिति व्यवहारात् ॥ अ
त एव मणिकृद्भिः खितपंचलक्षणी व्याघातः ॥ अत्र चाभावाभावस्यानतिरिक्ततापक्षे घटत्वाभाव
दिसाध्यकेः व्याप्तेः ॥ अभावत्वं तु न प्रवेश्यं ॥ तदतिरिक्ततापक्षे च प्रयोजनभावादित्याशयेनाह ॥ प्रति
योगितासंबंधेन साध्यीयइति ॥ साध्यीयत्वात्वयमभेदस्तत्तीयार्थः ॥ नन्वेवं कपिसंयोगीएतत्वा
दित्यादौ वृक्षत्वनिकपिसंयोगाभावस्य साध्यवद्भिन्नेकालिकसंबंधेन वृत्तेरव्याप्तिः ॥ साध्यवद्भि
न्ने प्रतियोगिमत्त्वासहविरोधिताघटकसंबंधेन वृत्तित्वनिवेशेपि कालिकसंबंधे कालिकसंबं
धावच्छिन्नवृक्षवृत्तिकपिसंयोगाभावाभावरूपप्रतियोगिमत्त्वासहविरोधितानियामकत्व
सत्वात्स एव दोषः ॥ यत्संबंधावच्छिन्नप्रतियोगितासंबंधेन साध्यवत्त्वं तत्संबंधेन प्रतियोगि
मत्त्वानिवेशेपि द्रव्यत्वाभावे कालिकसंबंधेन साध्यकालत्वादावव्याप्तिः ॥ दैशिकविशेषणता

संबंधावछिन्नप्रतियोगितासंबंधेनसाध्यीयोद्रव्यत्वरूपोऽभावस्तस्यतत्प्रतियोगिमत्ताग्रह
विरोधिताकटकसमवायसंबंधेनसाध्यवह्निन्नवृत्तित्वात्॥ नचसाध्यतावच्छेदकसंबंधेनसाध्यवत्ता
ग्रहविरोधितानियामकसंबंधेनसाध्याभाववत्तायाउक्तत्वान्नदोषः॥ तादृशसंबंधेनद्रव्यत्वा
धिकरणाप्रसिद्धेः॥ कालिकसंबंधावछिन्नसाध्याभावमादायैवलक्षणगमनात्॥ प्रतियोगि
मत्ताग्रहविरोधितानियामकसंबंधेनतद्धत्वोक्तौउक्तदोषतादवस्थ्यात्इतिवाच्यंकालिक
संबंधावछिन्नप्रतियोगिताकमहाकालवृत्तिगगनाभावाभावेमहाकालमात्रवृत्तिविशेषण
तासंबंधेनसाध्येमहाकालपरिमाणादौव्याप्तेः॥ साध्यवह्निभिन्नेजन्येतथाविधकालिकसं
बंधेनवृत्तेर्दैशिकविशेषणतासंबंधावच्छिन्नसाध्याभावस्यतद्गगनाभावरूपस्यतथावि
धस्वरूपसंबंधेनहेतुमतिमहाकालेसत्वात्॥ साध्यतावच्छेदकसंबंधेनप्रतियोगिमत्ता

राम

याः साध्यवत्ताग्रहविरोधितानियामकसंबंधेन साध्यवद्भिन्नवृत्तित्वनिवेशो द्रव्यत्वप्रकारक
प्रमाविशेष्यत्वाभावे व्यासज्यवृत्तिसंख्याविशेष्याधिकरणत्वाभावे वा कालिकसंबंधेन साध्यका
लत्वादावव्याप्तिः॥ तादृशस्वरूपसंबंधेन साध्यवद्भिन्नवृत्तेर्दैशिकविशेषणतासंबंधावच्छिन्न
साध्याभावस्य द्रव्यत्वप्रकारकप्रमाविशेष्यत्वादिरूपस्य तथाविधस्वरूपसंबंधेन कालवृत्ते
स्तस्मात्साध्यतावच्छेदकसंबंधावच्छिन्नप्रतियोगिताकसाध्याभावो वक्तव्य इति चेन्न॥ अ
भावाभावस्यातिरिक्ततामते नैतल्लक्षणकरणात्॥ अभावीयविशेषणतासंबंधेन साध्यवद्भि
न्नवृत्तित्वं वह्निमान् धूमादित्यादौ हेतुमति कालिकविशेषणतासंबंधेन साध्याभाववत्त्वा
दव्याप्तिकरणाय॥ तेन संबंधेन साध्याभाववत्त्वं चानिविष्टमिति सकलदोषोद्धारात्॥ न चैवं
समवायादिसंबंधावच्छिन्नवह्न्यभावस्य कथं निरास इति वाच्यं॥ अधिकरणभेदेनाभावभे

दात्॥ नचैवमपि पूर्ववत्तस्य समवायादिना साध्यवह्निमत्त्वात्कथमुक्ताभावनिरास इति वाच्यं॥ साध्यतावच्छेदकसंबंधेन साध्यवत्त्वनिवेशात्॥ नत्वभावत्वमपीति॥ नत्वाभावत्वानिवेशे अभावपदोच्चारणासंगतिरिति वाच्यं॥ वह्निप्रतियोगिकसमवायस्य स्वरूपसंबंधेन साध्यवह्निमद्वृत्ते वारणाय विलक्षणप्रतियोगितानिवेशार्थं तस्योच्चारणात्॥ वैलक्षण्यं चाभावत्वावच्छिन्नानुयोगिता॥ यद्वाभावभिन्नत्वरूपमभावत्वं न प्रवेश्यते किंतु स्वरूपसंबंधेन वृत्तित्वं बोध्यं॥ अखंडोपाधिर्वा॥ नव्यमतमाह॥ वस्तुत इति॥ साध्यतावच्छेदकसंबंधेन साध्यवन्निष्ठत्वोक्तौ वक्ष्यमाणसाध्यपदस्यार्थस्य संगतिः॥ संबंधसामान्येन तदुक्तौ कालिकसंबंधेन धूमवह्निन्नि धूमासमानकालीनपदार्थे वर्तमानधूमाभाववद्वृत्तित्वस्य वह्नौ सत्त्वादतिव्याप्तिरित्यत आह॥ स्वप्रतियोगितेति॥ साध्येति॥ साध्यतावच्छेदकसंबंधावच्छिन्नप्रतियोगिता

पात
२०

कत्वसंबंधेनेत्यर्थः॥ अव्याप्तिरिति॥ घटभिन्नेऽनन्यतमत्वानत्वादित्यादौ लक्षणगमनात्॥
न च घटभेदभेदस्य प्रतियोगितावच्छेदकीभूततादात्म्यसंबंधेन साध्यवान्यस्तद्भिन्नं घटत्वेन
मेवेति कथमेतत्॥ तादात्म्यसंबंधस्य भेदप्रतियोगितावच्छेदकताघटकत्वेनोपगम्यते॥ अन्यथा ता
दात्म्येन तद्विशिष्टं यत्तादात्म्यसंबंधेन तद्विशिष्टादेरपि भेदस्वीकारापत्त्याऽनवस्था स्यात्॥ न च
वंतातात्म्येन वन्हिविशिष्टस्य तादात्म्येन साध्यतायामव्याप्तिरिति वाच्यं॥ पारिभाषिकावच्छे
दकत्वाघटितलक्षणपंचकाव्याप्तिरिष्टत्वात्॥ यद्वा॥ वृत्तिनियामकसंबंधेन प्रतियोगितासंबं
धेन साध्यविशिष्टत्वनिवेशादिति॥ न च साध्यतावच्छेदकसंबंधेन प्रतियोगितासंबंधेन [illegible] वि
द्विशिष्टत्वनिवेशे साध्यवैयर्थ्यमिति वाच्यं॥ एतन्मते गगनाभावस्यैक्याद्व्याप्तेः॥ न चाद
त्या स्वरसस्वनाय॥ स च तादृशादौ त्यालाघवात्स्वप्रतियोगितावच्छेदकसंबंधेन साध्यव

ङ्गिन्नो यः साध्याभाववानिति कर्मधारय एव साधीयान् स्यात्॥ साध्यतावच्छेदकसंबंधेन साध्या
भाववार्थकसाध्याभावपदस्य सार्थक्यात्॥ अभावत्वानुपादानस्य तुल्यत्वात्॥ अत्र चेदमालोच्यं
ति॥ नव्यमते साध्यनिवेशेऽपि साध्यतावच्छेदकं न विशत्यते प्रयोजनाभावात्॥ द्रव्यत्वाभाववत्पृथिवीत्वा
भावान्यतरवान् जलत्वादित्यादौ साध्यवद्भिन्नपृथिवीनिष्ठद्रव्यत्वरूपाभावमादाय व्याप्तिवारणा
य भावभिन्नत्वरूपमभावत्वं निवेश्य॥ घटत्वाभाववादिसाध्यके च विशिष्टाभावोभयाभावादिघटो
वृत्त्यभावादिश्च लक्षणघटकः अधिकरणभेदेनादोषात् अभावाभावोऽतिरिक्त इत्यग्रि
मग्रन्थश्च अभावत्वेन न प्रविष्टमिति मत्ताभिप्रायकः॥ एवं च साध्यवद्भिन्नपृथिव्या एव द्रव्य
त्वरूपसाध्याभाववत्त्वाद् भावत्वविवक्षावैयर्थ्यमिति कर्मधारयापेक्षेति॥ अत्राहुः॥ स
मनियतभावैक्यमते पर्वतादेः संयोगावच्छिन्नवह्न्यवयव[illegible]युक्तद्रव्याभावस्य समवा

राम
२१

$2

येनवह्न्यभावाभिन्नतया संयोगसंबंधावच्छिन्नसाध्याभावीय समवायरूपप्रतियोगितावच्छे
दकसंबंधेन साध्यवद्भिन्नत्वाद्व्याप्तिः॥ नन्वेवं वह्न्यवयवे संयोगेन वह्नेरसत्त्वान्नायमभावोलक्ष
णाघटक इति वाच्यम्॥ एवमपि जातिमान् सत्त्वादित्यादौ समवायसंबंधावच्छिन्नकालसमवेत
त्वविशिष्टजात्यभावस्य कालिकसंबंधावच्छिन्नजात्यभावाभिन्नतया तस्य केवलान्वयिजाति
विषयकसमवेतत्वविशिष्टजात्यभावस्य विषयितासंबंधावच्छिन्नजात्यभावाभिन्नतया निःसा
दौ समवायसंबंधावच्छिन्नसाध्याभावप्रतियोगितावच्छेदककालिकादिसंबंधेन साध्यवद्भिन्न
त्वसत्त्वादव्याप्तेर्दुर्वारत्वात्॥ अतः नव्यमते साध्यतावच्छेदकावच्छिन्नीयत्वमावश्यकं तथा च
भावत्वमनुपादेयमेव॥ द्रव्यत्वाभावपृथिवीत्वाभावान्यतरसाध्यके द्रव्यत्वस्यातथात्वेनादो
षात्॥ यदि च साध्यतावच्छेदकसंबंधावच्छिन्नप्रतियोगितावच्छेदकसंबंधेन साध्यवद्भिन्नत्व

त्तियः साध्याभाववद्वृत्त्युच्यते॥ तदा तादृशसंबंधेन साध्यवद्भिन्नवृत्तित्वयोर्भावभिन्नत्वस्यापि सम्य
क्त्वेन साध्यपदवैयर्थ्यं॥ एवं समनियताभावभेदेऽपि साध्यपदानुपादाने साध्यतावच्छेदकसंबंधा
वच्छिन्नप्रतियोगिताकाभावभिन्नविवक्षापत्तिवारणाय नव्यमतेऽभावत्वमनुपादाय साध्यतावच्छे
दकावच्छिन्नसाध्यीयत्वविवक्षणमावश्यकं॥ अभावाभावस्यातिरिक्तत्वावलंबनेनेति कर्मधारय
स्य साध्यीयत्वं कथं वारयेदिति॥ कर्मधारयपक्षेऽभावभेदमतानुधावनवैयर्थ्येनाधिकरण
भेदेनाभावभेदवादिनामिदं लक्षणमिति संवादभंगः स्यादतस्तदुपेक्षेत्याहुः॥ भेदद्वयस्येत्यव्या
प्यवृत्तिसाध्यकाव्याप्तिशंकाव्युदासार्थं॥ अव्याप्तिरिति॥ गगनाभावमादाय संभवेऽपि साध्य
पदमव्याप्तिवारकमेव॥ अव्याप्यवृत्तिसाध्यके साध्याभावभेदस्य वाऽव्याप्यवृत्तिवारकत्वा
दित्याशयेनेदं॥ गगनादेः सद्धेतुत्वं वोपेयं॥ ननु स्वमतेन तयोर्विरोधः गुणवृत्तित्वगुणा

राम
२२

न्यवृत्तित्वोभयरूपत्वात्॥अन्यथासत्तादेरपिभेदापत्तेरित्यतआह॥दिगिति॥तर्हिव्याप
वृत्तित्वादेरपिस्वमतेनविरोधः॥किंतुअभावमात्रस्यैवभेदमादृत्यैतल्लक्षणं॥अभावाभावस्या
प्यतिरिक्तत्वंचातोनद्रव्यत्वप्रमेयत्वाद्यसंग्रहइतिसाध्यपदप्रयोजननिर्वाहइति॥किंचमणिकृ
तांव्याप्यवृत्तित्वादेरभावभेदसाधकत्वेननिर्भरः॥अतएवतैः नचप्रतियोगिविरोधीसंयो
गादेरपरोत्यंताभावोस्तीतिमतनिराकरणप्रसंगेऽधिकरणभेदेनभेदेभानाभावादित्येवोक्तं॥अ
न्यथाभावादित्येवब्रूयुरिति॥अथास्तुउक्तकर्मधारयेसाध्याभावपदवैयर्थ्येपिसाध्यवद्भि
न्नश्चासौसाध्याभावश्चेत्येवकर्मधारयः॥मस्तुरूपस्यजघन्यत्वात्॥साध्यत्वंचस्वप्रतियो
गिकत्वस्वसामानाधिकरण्योभयसंबंधेन॥स्वप्रतियोगिकत्वंचसाध्यपदवारणायअन्यथा
घटाभावादेःसाध्यसमानाधिकरणतयैववारणात्तद्वैयर्थ्यंस्यात्॥समानाधिकरण्यसा

ध्यवच्छिन्नसाध्याभावाप्रसिद्धिवारणाय॥ नच सामानाधिकरण्यघटकतया साध्यतावच्छेदकध
र्मसंबंधनिवेशो गौरवं॥ अन्यथा विशिष्टसत्ता साध्यके साध्याभावासंग्रहापत्तेरिति वाच्यं॥ साध्य
तावच्छेदकधर्मसंबंधावच्छिन्नत्वरूपप्रतियोगित्वविशेषणानिवेशेन समत्वात्॥ एवंच साध्यव
च्छिन्नाभावाप्रसिद्ध्यैव केवलान्वयिन्यभावादिति मूलसंगतिर्न तु साध्यतावच्छेदकधर्मसंबंधा
वच्छिन्नाभावाप्रसिद्ध्येति॥ घटत्वघटाकाशसंयोगान्यतराभाववत्साध्यके साध्याभावस्य प्रति
योग्यात्मकत्वेपि नाव्याप्तिरिति चेन्न॥ साध्यपदसार्थक्याय स्यप्रतियोगिकत्वप्रवेशस्य प्रक्षाल
नाशुद्धिन्यायग्रस्तत्वात्॥ नच सामानाधिकरण्यस्य स्वविशिष्टप्रतीत्यनियामकतया तद्वि
शिष्टानुयोगितायाः संबंधत्वेन निवेशोऽनावश्यक इति साध्याभावपदसार्थक्यमिति वाच्यं॥
तत्किमवच्छेदकावच्छिन्नप्रतियोगित्वानिरूपितानुयोगितासंबंधेनायेन सामानाधिकरण्य

राम
२३

विशिष्टतादृशानुयोगितासंबंधेन साध्यप्रकारकाभावप्रतीतिरस्ति अथ तथाविधतदसत्वे
पि योऽवच्छेदकावच्छिन्नप्रतियोगिताकत्वसंबंधेन साध्यवत्वेन प्रतीयते॥ भावत्वस्य सामानाधि
करण्यविशिष्टानुयोगितासंबंधेन साध्येन रूपेण भेदो न दुर्घटः॥ यत्तु तत्कल्पे कालिकसंबंधा
वच्छिन्नाकाशाभावाभावसाध्यकात्मत्वादौ व्याप्तिः॥ वह्निसामान्याभावसंग्रहाय साध्यव
त्ताग्रहविरोधितानियामकसंबंधेन स्वसामानाधिकरण्यं निवेशास्तु न सन्॥ उक्तस्थले त
थाविधकालिकसंबंधघटितसामानाधिकरण्याप्रसिद्धेरिति॥ तन्न॥ कालत्वादितररत्या
काशाभावयोर्भेदात्॥ कालान्तरस्थभावमादाय नाव्याप्तिरिति कश्चिदिति चेत्॥ भवन्मतेप्यधि
करणभेदेनाभावभेदस्यावश्यकतया प्रतियोगितावच्छेदकताघटकसंबंधयोरवागीकार
स्यायुक्तत्वात्॥ यदि चाभावभेदो नोपगम्यते किं तु कपिसंयोगादिसाध्यके गुणान्यत्वभावो

वह्न्यादिसाध्यके च हृदादौ तेः समवायेन स्वरूपसंबंधेन वाऽभावो लक्षणघटक इत्युच्यते तदाधि
करणभेदेनाभावभेदं विनानुपपत्तेरनाशंकनीयत्वात्॥ किंच॥ साध्यमस्यास्तीति वत्तु साध्यसाधनयोः
सामानाधिकरण्यभिन्नसामानाधिकरण्यमतु अनुत्पन्न इति॥ यत एवेति॥ अत एव कालिकसंबं
धावच्छिन्नाकाशाभावाभावसाध्यके साध्याभावस्याकाशाभावात्मनोऽधिकरणभेदेन भि
न्नतया नाव्याप्तिः॥ ननु वह्निमान् धूमादित्यादौ साध्याभावस्य कालिकविशेषणतासंबंधे
न हेतुमति सत्वादव्याप्तिः॥ अभावीयविशेषणतासंबंधेन साध्याभाववत्वविवक्षणा घटत्वाभा
व साध्यकेऽव्याप्तिः॥ घटत्वस्यैव तदभावरूपत्वात् तः साध्यवत्ताग्रह विरोधितानियामकसं
बंधेन तद्वत्वं वाच्यं॥ तथा च तादृशसमवायसंबंधेन साध्यवद्भिन्नेऽनित्यत्वादिविवक्षायाद्र
व्यत्वादिकमादायाव्याप्त्यप्रसक्तेः साध्याभावपदवैयर्थ्यापत्तेः॥ न च दर्शितान्यतराभावा

भावस्यैवातिरिक्तत्वं नतु द्रव्यत्वाभावाभावस्येति ग्रंथकृदाशय इति बोध्यं ॥ तथापि तत्रा
भावीयविशेषणतासंबंधेन साध्यवद्भिन्नवृत्तित्वासत्वात् ॥ द्रव्यत्वादेरुक्तरत्वादिति चेन्न ॥
स्वरूपसंबंधेन साध्यवद्भिन्नवृत्तित्वं साध्याभाववत्त्वं च निविष्टं ॥ अभावीयविशेषणतात्वेतर
त्वर्गतैव ॥ तेन घटत्वाभावादिसाध्यके तदभावोप्यतिरिक्त एवेति नाव्याप्तिः ॥ वह्निमान्धूमादि
त्यादौ प्रमेयत्वादिवारणाय साध्याभावपदमित्यप्याहुः ॥ दीधितौ कर्मादाविति ॥ द्रव्यं कर्म
गुणेति सत्त्रात् ॥ स्पष्टं तु ज्ञायुः साध्याभाववदवृत्तित्वादिलक्षणलक्ष्यतायाः केवलान्वय
इति शेषः ॥ इदं तु बोध्यं ॥ ग्रंथकारमते व्याप्यवृत्तिसाध्यकेऽव्याप्यालक्षणस्यावतारेपि
तत्र तत्समन्वयं विस्मृत्यैवेदं लक्षणं कृतमिति वक्तव्यं ॥ उभयाभावमादायैतत्कपिसंयो
गीएतत्वादित्यादौ नापि अव्याप्तेः ॥ ननु व्यासज्यवृत्तिधर्मानवच्छिन्नत्वं प्रतियोगिता

विशेषणमभिप्रेतं॥ तथासति गगनपर्यन्तानुधावनस्य निर्वहंतत्वापातात्॥ यद्वोभयाभा
वानुपगमे एव निर्भरः॥ न चेत्यादिशंकाचतादृशाभावोपगंतृमते ऽव्याप्तिपदेयोजयितुंशक्य
मित्यभिमानेन॥ अथवाऽभाववभेदमानाभावामद्वोभयाभावोपगम एवाषतारकइति गगन
मेवगतिः॥ एतत्कपिसंयोगी एतत्वादित्यादौलक्षणसंगतिः॥ वस्तुतस्तुलक्षणकृन्मते उ
भयाभावोपगमेपि अव्याप्यवृत्तिकेलक्षणसमन्वयार्थं साध्यवत्पक्षभेदो निवेश्यः॥ अ
न्यथासध्यवद्घटितंचिह्नितेस्येवव्यर्थयात्॥ पक्षभेदः पक्षतावच्छेदकावच्छिन्नभेदः तत्रसाध्य
वत्प्रतियोगिकत्वं विशेषणं ह्रदोवह्निमान् ह्रदत्वादित्यादिवारणाय व्यासेः॥ साध्यघ
टितत्वायच॥ एवंच कपिसंयोगी एतत्वादित्यादावपिलक्षणगमनं॥ साध्यवत्पक्षेति
दीधितिस्तुकपिसंयोगीकपिविभागादित्यादिनानाधिकरणकहेतावव्याप्तिपरार

राम
२५

ष्टांतपदेन नानाधिकरणकत्वव्यंजनं ॥ गगने लक्षणसंपादनं तु व्यर्थं ॥ अन्यत्रापि लक्षण
सत्वात्तत्रापि तदस्तीति चेत् ॥ न स्वव्याप्यव्याप्यवृत्तिसाध्यकत्वं त्तिमद्भूतत्वावच्छेदेनाव्याप्यस्य ग्र
हणात् ॥ अस्माकं च तादृशनियमनिराकरणमात्रादेवेष्टसिद्धेरिति ॥ साध्यत्वप्रतियोगिक
त्वं साध्याभावच्छिन्नप्रतियोगिताकत्वमसंभववारणाय निवेश्यमिति मतांतरमाह ॥ साध्य
पदस्येति ॥ एतन्मते रक्षांतरीयकपिसंयोगव्यक्तेः सिद्धिकर्मत्वाभावादेव तद्दक्षत्वादौ ना
व्याप्तिरिति प्रागुक्तदोषोद्धारः साध्यवत्त्वलक्ष्येति दीधितिस्थसाधुस्वगच्छेत्सिद्धिकर्मत्वं
परिचायकमात्रं ॥ अन्यथा सिद्धिविषयकत्वे न सिद्धिहेतुत्वापत्तेः तस्य केवलान्वयि
त्वाच्चेत्याशयेनाह ॥ तत्तदिति ॥ घटपटोभयभेदवारणाय यावच्छिन्नो निवेशः ॥ नचो त्व
भयावच्छिन्नभेदस्यैकव्यक्तिसाध्यकेऽपि दुर्वारत्वमिति वाच्यं ॥ तद्व्यक्तिमात्रावच्छिन्नत्व

स्योत्कत्वात्॥ तच्च तद्व्यक्तित्वेतरधर्मानवच्छिन्नतद्व्यक्तिनिष्ठावच्छेदकत्वानिरूपकत्वं॥ तेन
किंचिद्वृत्तित्वविशिष्टद्रव्यत्ववद्भेदनिरासः॥ निरवच्छिन्नत्वमुपेक्ष्य तादृशधर्मानवच्छिन्नत्वोक्तेः स
समानाधिकरणयोरेव व्याप्तिरिति मते वह्निमान् धूमादित्यादौ लक्षणसंगतेस्तदुपेक्षा॥ न
न्वेतन्मते व्याप्तिघटकसाध्यतावच्छेदकानवगाहिज्ञानस्यानुमितौ कथं हेतुत्वं॥ न च यं व्याप्ति
व्यवहारमात्रोपयोगिनीति वाच्यं॥ तथा सत्यनुमितिप्रयोजकव्याप्तिस्वरूपजिज्ञासायाम्
तल्लक्षणाभिधानेऽर्थांतरप्रसंगात्॥ परामर्शे तद्व्यक्तित्वेनैव साध्यभावस्यावश्यकत्वाद्व
ह्निमानित्यनुमितिविलोपप्रसंगात्॥ मैवं॥ तद्व्यक्तित्वपुरस्कारेण सिद्धिक्रमव्यक्तो यो धर्मः
प्रकारतयाभासते तस्यैव विधेयतावच्छेदकतया भानोपयोगात्॥ तच्च तत्तानपृथगेव॥ तद्व्य
क्तित्वेन वन्ह्याद्यवगाहिपरामर्शेऽपि दितद्व्यक्तित्वेन भानसंभव इति॥ अत्र साध्यवत्त्वाति

साम
२८

योगिकेत्यक्षरासंगतेरुक्तस्त्वं॥ अत एव चरम एव साध्यवत्वावच्छिन्नप्रतियोगिताकत्वमर्थि
तमित्यस्वरसः॥ अवच्छिन्नत्वाविशेषितप्रतियोगितायाः संसर्गत्वाभावेपि प्रकारतया निवेशा
न्न सिद्धांते दोषः॥ इदं तु विभावनीयं॥ अवच्छिन्नत्वाविशेषितप्रतियोगिता विवेशोत इति तस्या
व्यभिचारपदार्थत्वानुपपत्तिः॥ धूमो वह्निव्यभिचारीति धीयत्वं वाच्यत्वव्यभिचारीनिस्तैयत्वं वा
चत्वव्यभिचारीति प्रत्ययातिप्रसंगभयेन तत्र तादृशप्रतियोगित्वाप्रवेशात्॥ केवलान्वयिनी
त्यादिदूषणस्य साध्यवत्प्रतियोगिताकभेदवद्वृत्तित्वमादाय संगमनीयत्वापाताच्च॥ यद्वि तु
साध्यावच्छिन्नप्रतियोगितायाः प्रकारत्वसंसर्गाभ्यां स्वावच्छिन्नप्रतियोगितावच्छेदकताक
त्वसंबंधेन साध्यतावच्छेदकावच्छिन्न[illegible]भेदसाध्याव[illegible]न्नभेदाभ्यां वा तत्तीय
पंचमयोर्भेद उच्यते॥ तदादीधितिरुक्तां पक्षपदोपादानप्रसंगतं स्यात्॥ साध्यवत्प्रतियोगिक भेदसामानाधि

करण्यस्यव्यभिचारपदार्थत्वाभिमानेनेदं॥ ननुह्रस्वावच्छिन्नभेदादिश्चलक्षणकर्त्रीवास्तोचित
इतिचेदस्तु॥ तथेति॥ अप्रसिद्ध्येति॥ साध्यतावच्छेदकसंबंधेनप्रतियोगिवैयधिकरण्यस्यसा
ध्याभावेवक्तव्यतयावत्प्रतियोगितायांतत्संबंधावच्छिन्नत्वंननिवेश्यमितिअभावकूटाधि
करणाप्रसिद्धिः॥ अथयेनसंगच्छतेनिरूक्तसंबंधेनप्रतियोगिवैयधिकरण्यमेवैतेऽभा
वाधिकरणतायांसंबंधविशेषावच्छिन्नत्वस्यनिःप्रयोजकतयासाध्याभावेसाकल्यसत्वेपि
तत्कूटाधिकरणंकालिकसंबंधेनजन्यगुणादिरेवप्रसिध्यतीतिचेन्न॥ तन्नद्विपक्षानिरूपि
तस्वरूपसंबंधावच्छिन्नाधेयतात्वावच्छिन्नाभावविशिष्टाग्रेधूमादयस्तदभावानांअती
तनागतवर्तमानप्रतियोगिकानांतत्तद्ध्वंसप्रागभावात्मनांकेनापिसंबंधेनगुणादेरधि
करणत्वात्॥ कालादेश्चसाध्यतावच्छेदकसंबंधेनप्रतियोगिसंबंधित्वादिति आस्यसंभव

राम
२७

दृस्यभिप्रायात्॥ नित्यज्ञानादेस्तुतदधिकरणत्वेतु विंशत्यएवायंपंथः॥गगनादृत्तिधर्मवानेतत्वा
दित्यादोअव्याप्तिमनंताभगायाह॥ तन्नतत्सपक्षेति॥ केचित्तु विपक्षेसाकल्यपक्षेसाध्याभावस्या
न्याहृशत्वेपिइदानीं साध्यतावच्छेदकातिरिक्तसाध्यव्यापकतावच्छेदकधर्मावछिन्नाभावस्यसा
ध्यव्यापकतावच्छेदकधर्मावछिन्नसाध्यवृत्तिप्रतियोगिताकाभावस्यवानिवेशेतत्राद्विपक्षावृत्त्य
भावनिरासादाह॥ तन्नतत्सपक्षेति॥ नचस्वव्यापकसाध्यतावच्छेदकप्रतियोगिताकाभावनि
वेशादस्यापिव्युदासइतिवाच्यं॥ एवमपिरूपाभाववान्वायुत्वादित्यादावव्याप्तेरितितदर्थमा
लेख्याभासयेति॥ तेषांवन्हिधर्मोभयवान्वन्हेरित्यादौतत्तद्वन्ह्युभावघटितस्तोममादा
यातिव्याप्तेर्नवारणमितिद्रष्टव्यं॥ एतद्घटभिन्नंवापटत्वादित्यादौवैशिष्ट्याःनधवछिन्न
प्रतियोगितानिवेशेनतत्तत्सपक्षवृत्तित्वविशिष्टाद्यभाववारणात्॥ तद्विपक्षावृत्तित्वावछिन्न

साध्यनिष्ठप्रतियोगिताकाभावघटितकूटाधिकरणनिष्ठाभावप्रतियोगि[illegible]त्वस्यपक्षत्वेसत्वेनलक्ष
णगमनादव्याप्तिरिति॥असिद्धेरिति॥प्रतियोगितावच्छेदकसंबंधेनप्रतियोगिवैयधिकरण्यसाध्य
तावच्छेदकसंबंधावच्छिन्नाभावस्येदव्यतेतदानाप्रसिद्धेः॥किंतुधूमवान्वन्हेरित्यादावतिव्याप्तिः
गुणादेरवत्तादृशसाध्यभावस्तोमवत्वादितिद्रष्टव्यं॥एतएवेति॥अन्यथायत्किंचित्साध्याभा
ववद्यत्किंचिन्निष्ठाभावप्रतियोगि[illegible]त्वस्यनानाव्यक्तिसाधकेऽव्याप्त्यसत्वात्॥अतिप्रसंगा
दिति॥प्रथमतःसाध्यकृत्स्नोपादानेतुगुणत्वादेरपिसंग्रहात्॥तदभाववानागुणादिः किंतुग
गनाभाववमतोनातिव्याप्तिरितिभावः वन्हिमान्वन्हिमद्भेदादित्यादौस्वरूपसंबंधावच्छिन्न
वन्ह्यभावमादायातिव्याप्तेर्वारणायसाध्येसाकल्येविशेषणात्प्रागेवसाध्याभावेसाध्य
तावच्छेदकसंबंधावच्छिन्नप्रतियोगिताकत्वसत्वात्॥समवायेनसंयोगेनवासाध्यताया

सामान्यादेः सकलसाध्याभावावत्वादिति व्याप्तिरिति विपक्षे साकल्यस्यावश्यकतया साध्ये साकल्यं व्यर्थमिति चेन्न स्वरूपसंबन्धेन साध्यतांकृत्स्नत्वनय॥ एवं च पटत्वादिस्य स्य पटत्वप्रकारक प्रमाविषयत्वादीत्यर्थः॥ यदि विपक्षे साकल्येपि नायं दोषः साध्ये साकल्यस्याविशेषणात त्रा निवार्यदोषवारकत्वं प्राचीनसंमतं इत्युच्यते तदा गगनं तद्रूपोभयवान् एतत्वादित्यादौ गगने तद्रूपोभयाभावस्य प्रतियोगितावच्छेदकावच्छिन्नवैयधिकरण्याप्रसिद्धेः केवलेन तद्रूपाभा वमादाय अतिव्याप्तिरिति प्रथमत एव साध्ये साकल्यं प्रवेश्यं तथा च गगने तद्रूपोभयाभाव स्यैव तादृशस्य तादृशवैयधिकरण्याप्रसिद्धेर्नातिव्याप्तिरित्यभिप्रायः॥ एवं सत्तागगनो भयवान् घटत्वादित्यादावप्यूह्यं॥ वस्तुतस्तु प्रथमत एव साध्ये साकल्यं प्रवेश्यापि गगने तद्रू पान्यतराभाव एतद्रूपवदन्यात्वितावच्छिन्नाभावं चादाय अतिव्याप्तिदुर्वारैवः न च मात्रा

मतेपि तत्रातिव्याप्तिरेव विपक्षे प्रवेशात् साध्या प्रतियोगि वैयधिकरण्य सद्भावेन गगने तद्रू
पोभयाभावस्य गगनत्वादिति वाच्यं॥ तन्मते साध्ये साकल्य साचिव्येन तस्य दतिव्याप्त्युद्धारक
त्वात्॥ साकल्य द्वयनिरुक्त प्रतियोगि वैयधिकरण्ययोः सत्वेपि यतद्रूपवत्वात् तदभावमा
दाय तेनातिव्याप्तिस्तु तेषां कल्पान्तरावतार बीजमेव॥ ग्रंथकृतामपि तथेति चेत्तर्हि जितं प्रा
चीनैरिति॥ केचित्तु स्वस्मात्तिव्याप्त्युद्धारे न विपक्ष साकल्येन गगनाद्यत्ति धर्मादि साध्यका
तिव्याप्तेरपि वारणमाशंक्य साध्यादि भेदेन व्याप्तिभेदादेक विपक्षक साकल्यं निष्प्रयोजन
मिति साध्य साकल्येनातिव्याप्ति वारणमित्यभिप्रायं वदंति असंभव [illegible] ति॥ नन्वेतद्वृत्तिया
वृ[illegible]मर्वानर एतत्वात् [illegible] गगनत्वादि साधो हेतुत्वाद्यवच्छिन्न साध्याभावस्य प्रति
योग्यधिकरण प्रसिद्धं लक्षणागमनादसंभव इति चेन्न॥ यत्किंचित्साध्यासमानाधि

राम
२१

करणसाध्यकहेतावसंभवस्योक्तत्वात्॥यत्किंचित्त्वंचसाध्याधिकरणविशेषणं॥तेनसत्ता
द्रव्यत्वपृथिवीत्वान्यतमवान्पृथिवीत्वादित्यादौप्रकृतसाध्यगुणउभयाभावमादायाव्याप्तेः
सत्वेपिनन्यूनता॥ननुसाकल्यंतयावत्त्वावच्छिन्नाभावाप्रसिद्धेः॥साध्यतावच्छेदकव्यापकप्रति
योगिताकाभावोक्तौचदर्शितोभयाभावोनवार्यतेऽतः साकल्यंअनेकत्वेसत्यशेषत्वं॥तत्राशे
षत्वंसमभिव्याहृतपदार्थतावच्छेदकसमानाधिकरणयावद्धर्मवत्त्वेसतितदसमानाधि
करणयावद्धर्मवत्त्वं॥दन्यत्वं॥तथाचसाध्यतावच्छेदकसमानाधिकरणयावद्धर्माणां
प्रत्येकसमानाधिकरणतादृशासमानाधिकरणयावद्धर्माणांप्रत्येकत्वसमानाधिक
रणानेकसाध्यवृत्तिप्रतियोगिताकाभावः सकलसाध्याभावःउक्तनिरुक्तौतदस
मानाधिकरणेत्यादेरशेषपदार्थत्वानुपगमेएकव्यक्तिकसाध्यमितिदोषासंगतिः॥

एतद्रूपावि साध्यके एतद्रूपगे धोभयाभावादि संभवात्॥ स्वप्रतियोगिवृत्तित्वस्वाश्रयवृत्ति
त्वोभयसंबंधेन भेदवत्वे सति साध्यवृत्तित्वरूपस्यानेकसाध्यवृत्तित्वस्य प्रतियोगितायां स
त्वात्॥ न चोक्तोभयसंबंधेन भेदवत्साध्यतावच्छेदकवद्वृत्तित्वं तदिति वाच्यं॥ तर्हि उक्तभाववी
रणार्थे न द्विशेषणादित्यत आह॥ किंचेति॥ नाम्ना: साध्याभाववच्छेदेनाऽहो विमलं जल
नद्या: कच्छे महिषश्चरतीत्यादौ विमलं जलमित्येतदंशवणस्थले जलवद्देशारूपकच्छपदार्थे
नदीसंबंधान्वयासंभवेन पदार्थपक्षकानुमा[illegible] नेव्यभिचारं प्रदर्शयता मणिकृता तदेकदेश
जले निराकांक्षत्वनिर्वाहकानन्वयव्युत्पादनमात्रं तदुभयत्र साकल्यान्वयोऽव्युत्पन्न एव॥ एकत्र जनिता
न्वयबोधकपदस्यान्यत्र निराकांक्षत्वात्तथा चैकवाक्यतारूपसामर्थ्याभावान्न कर्मधारयानुशास
न प्रवृत्ति:॥ सकलपदेन मध्यमपदलुप्तस्तु न समास: अर्थैवान्योपपत्तिसंभवात्॥ मध्ये साकल्या

नाम ३०

भवेन्नो तु तत्तद्व्यक्त्यभावामादायाव्याप्तिरितिसंभवः॥ नानेति अत्र नानाव्यक्तयो यस्य तत्त्वान्नानाव्य
क्ति साध्यकः सचासौ सद्धेतुश्चतस्मिन्नव्याप्तिरित्यत्रावच्छेदकावच्छेदेन विधेयान्वय औत्सर्गिकः।
तथाच तादृशसद्धेतुत्वावच्छेदेनाव्याप्तिरित्यर्थः॥ वह्निमान् गगनादित्यादावव्याप्त्यभावात्तत्त्वे
दव्याप्यत्वार्थकं॥ तेन॥ धूमसाध्यकवन्ह्यादेः साध्ये साकल्यादिनाऽव्याप्त्यवारणेपि न क्षतिः॥
तथाच शब्दवान् गगनत्वात् एतद्धूम धूमवान् एतत्वादित्यादौ अव्याप्त्यभावाद्विधेयान्वयानु
पपत्तिः॥ नानाव्यक्तिषु साध्यमित्युक्तावपि द्रव्यं पृथिवीत्वादित्यादावव्याप्त्यभावादसंगतिः॥
नानाव्यक्तिषु॥ नानासाध्यमिति व्युत्पत्तिवैचित्र्याद्यथाकथंचित्संगमनेपि सत्ताद्रव्यत्व
पृथिवीत्वान्यतमसाध्यकपृथिवीत्वेऽन्वयानुपपत्तिः॥ अतः साध्यपारिभाषिकं नानात्वं
निवेश्यं॥ तच्चयत्किंचित्साध्यासामानाधिकरण्यं॥ नह्ययंयत्किंचित्साध्यसामानाधिकरण्याभा

वविशिष्टसाध्यकइतितत्रविधेयानन्वयेपिनक्षतिः॥ नचसत्ताद्रव्यत्वपृथिवीजलान्यतरत्वादि
त्यादिन्यायस्थलीयहेतुर्नैतादृशः॥ तत्रविधेयान्वयाद्दीधितौन्यूनतापत्तिरितिवाच्यं॥ हेत्वाधि
करणयत्किंचिद्व्यक्तिवृत्तित्वस्यसाध्यनानात्वरूपत्वात्साध्यवच्छिन्नभेदप्रतियोगितावच्छेदकत्वयत्किं
चित्वाघटितमेवनानात्वं॥ व्याप्यव्यापकभावानापन्नत्वंसाध्यविशेषणं॥ यद्वा॥ स्वसमानाधिकरणभेद
प्रतियोगितावच्छेदकीभूतसाध्यवृत्तिष्ठप्रतियोगितावच्छेदकत्वंनानात्वमिति॥ तन्मंदं॥ उक्तसाध्य
कजलपृथिव्यन्यतरत्वासंग्रहकमिति॥ नचसाध्येसाकल्यानुक्तौ एकव्यक्तिसाकल्येपिद्वित्वावच्छि
न्नाभावसत्वादसंभवसत्वेनदीधितावव्याप्तिपदासंगतिरितिवाच्यं॥ साध्यतावच्छेदकातिरिक्त
व्यासज्यवृत्तिधर्मावच्छिन्नेनप्रतियोगिताविशेषणात्॥ प्रमेयवन्ह्यादिसाध्यकेवन्हिसामान्याभावसं
ग्रहायव्यासज्यवृत्तिपदं॥ वन्हिधूमोभयवान्वन्हेरित्यादौवन्हिधूमान्यतराभावमादायातिव्याप्ते

वारणायातिरिक्तांतं॥ वह्निधूमान्यतरवान् वह्नेरित्यादावतिव्याप्तिवारणार्थं साकल्यमावश्यकं॥
प्राच्यां मते संयोगसामान्यसाध्यकेऽव्याप्यभावात्कपीति॥ अव्याप्यवृत्तिसाध्यकव्याप्यवृत्तिसद्धेतुत्वा
वच्छेदनाव्याप्तिरित्यर्थः कपिसंयोगाभाववान् गुणसत्वात् द्रव्यादावव्याप्यभावादसंगतिः॥ समाना
धिकरण्येनाव्याप्यन्वयतुव्याप्यवृत्तिपदं व्यर्थं॥ अतोऽव्याप्यवृत्तिसाध्यकत्वं यद्धर्मावच्छिन्नाभा
वः साध्यतावच्छेदकावच्छिन्नसमानाधिकरणस्तद्धर्मावच्छिन्नसाध्यकत्वं॥ तेन घटत्वेन तत्समाना
धिकरणसंयोगान्यतरवान् घटत्वादित्यादावव्याप्यसत्वेपि न क्षतिः॥ एवमपि घटत्वतद्व्याधिकरण
संयोगान्यतरसाध्यक घटत्वेव्याप्यभावादसंगतिरतो यद्धर्मावच्छिन्नाभावो हेतुसमानाधिकर
णस्तद्धर्मावच्छिन्नाभावो हेतुसमानाधिकरणस्तद्धर्मावच्छिन्नसाध्यकत्वं तद्वाच्यं॥ एवमपि
कपिसंयोगाभाववान् द्रव्यत्वात् ज्ञन्यज्ञानविषयतावान् घटत्वादित्यादौ प्रतियोगिवैयधिकर

ज.टी.

मू.

ण्यविशेषणेऽपि दुर्वाराऽव्याप्तिरस्तीति चेन्नहि केवलान्वयिन्यभावादित्युतदूषणमध्येऽसंगृहा
णायथाश्रुतेति ॥ अव्याप्यवृत्तिसाध्यहेतुकेप्रयोजनाभावेनोभयभाविप्रतियोगिवैयधिकरण्या
प्रवेशेऽपि व्यक्षातिरिक्तेति तु बोध्यं ॥ न व्याप्तेस्तु तद्विशेषणास्फूर्तावपि दोषतापनायतत्पदमित्या
हुस्तदसत् ॥ न हि विशेषणस्फूर्तिदशायां साध्याभाववत्सकलनिष्ठहेतुतावच्छेदकावच्छिन्नयादृश
प्रतियोगितावच्छेदकावच्छिन्नानधिकरणतादृशप्रतियोगित्वमर्थः ॥ तदस्फूर्तौ तु यथाश्रुत एवा
र्थेद्रुति उक्तिवैचित्र्यमात्रस्याकिंचित्करत्वात् ॥ द्रव्यं संयोगाभावादित्यादौ अतिव्याप्त्यभावाद्व्यभिचार
निरूपकाधिकरणेऽव्याप्यवृत्तौ व्याप्तिमाह ॥ एतद्दूषणत्ववानिति ॥ एतत्प्रयोजनं चिंत्यं ॥ प्रतियो
गिताघटकसंबंधेन प्रतियोगिवैयधिकरण्यस्य साध्यताघटकसंबंधावच्छिन्नाभावस्य च निवेशे
गौरवादाह ॥ अत्र चेति ॥ लक्षणमिदमधिकरणभेदेनाभावभेदमादायास्य अन्यथा कपिसंयो

राम
३२

गेयतद्रूक्षत्वादित्यादौ हेतुमत्तो निरुक्तप्रतियोग्यनधिकरणगुणादिवृत्तिसाध्याभाववत्त्वेनाव्या
प्तिः॥ अन्यथासाध्यताघटकसंबंधेन प्रतियोग्यनधिकरणवृत्तित्वविशिष्टसाध्याभावाधिकरण
सकलवृत्तिप्रतियोगिताघटकसंबंधेन प्रतियोग्यनधिकरणवृत्तित्वविशिष्टहेत्वभाववत्त्वावच्छिन्ना
धिकरणताकत्वमित्यत्रतात्पर्यं॥ अथात्रसाध्यताघटकसंबंधेन स्वप्रतियोगितावच्छेदकावच्छि
न्नानधिकरणसाध्याभावाधिकरणं यत्सकलं स्वप्रतियोगिताघटकसंबंधेन स्वप्रतियोगिताव
च्छेदकावच्छिन्नानधिकरणं तन्निष्ठाभावीयहेतुतावच्छेदकावच्छिन्नप्रतियोगित्वं फलितं॥ ननु
साध्यानधिकरणत्वमेव साध्याभाववतो विशेषणं पर्यवसन्नमिति साध्याभावाधिकरणत्व
व्यर्थमत्राहुः॥ प्रतियोगिताविशिष्टान्यसाध्याभावाधिकरणं विवक्षितं॥ वैशिष्ट्यं च स्वा
वच्छेदकावच्छिन्नवृत्तित्वस्यानिरूपकाभावत्वावच्छिन्ननिरूपितत्वोभयसंबंधेन॥ तथा

च घटाभाववाधिकरणतावारणाय साध्याभावपदं॥ एते न साध्याभाववनिष्ठनिरूकप्रतियोग्यनधि
करणवृत्तित्वनिरूपकं यत्सकलं तन्निष्ठहेत्वभाववनिष्ठनिरूक्तप्रतियोग्यनधिकरणवृत्तित्वत्व
निरूपकताकत्वमनादेयं गौरवात्॥ प्रतियोगित्वस्य व्याप्तित्वानुपपत्तेश्च॥ आत्मेति॥ यद्यपि
वन्हिमान् धूमादित्यादौ साध्याभाववतोऽन्यस्य कालिकसंबंधेन हेत्वभावप्रतियोगिमत्वेना
व्याप्तिस्तथापि तत्र नित्यमात्रे प्रतियोगिवैयधिकरण्यविशिष्टहेत्वभावप्रसिद्धिः संभवति॥
न तु सकलविपक्षे इहतु सेवनेति विशेषप्रदर्शनार्थमिदं॥ अव्याप्तिरिति॥ आत्मभिन्न घटा
दित्यादौ लक्षणसंगतिः॥ प्रतियोगिपदमिति॥ साध्याभावीयप्रतियोगितावच्छेदकावच्छिन्न
प्रतियोगिवैयधिकरण्यघटकप्रतियोगिपदं॥ प्रतियोगितावच्छेदकताघटकसंबंधेनाव
च्छेदकतावैशिष्ट्यलाभाय॥ तेन धूमवान्वन्हेरित्यादौ गुणादेरेव कालिकसंबंधेन धूम

राम

३२

त्वविशिष्टद्रव्यानधिकरणधूमाभाववत्त्वेपि नातिव्याप्तिः॥ धूमासंयुक्तस्वावयवे समवायावच्छि-
न्नवह्न्यभावो सत्त्वान्न धूमवान्वह्नेरित्यादावतिव्याप्तिरत आत्मभिन्नमिति॥ नचेति॥ नचैवमयमात्मा
ज्ञानादित्यादौ व्यभिचारिण्यतिव्याप्तिः॥ समनियताभावैक्यमते विषयतासंबंधावच्छिन्नज्ञानत्व-
त्वविशिष्टज्ञानाभावस्य समवायावच्छिन्नज्ञानाभावतया हेतुतावच्छेदकावच्छिन्नसमवायसं-
बंधावच्छिन्नतत्प्रतियोगितासत्त्वादिति कथमियमाशंकेति वाच्यं॥ हेतुताघटकसंबंधेन यादृशी
प्रतियोगितातावच्छेदकावच्छिन्नानधिकरणं हेतुतावच्छेदकरूपावच्छिन्नतादृशप्रतियोगि-
तावत्त्वस्य तदर्थत्वात्॥ सिद्धांतेपि हेतुताघटकधर्मावच्छिन्नहेतुताघटकसंबंधावच्छिन्नता-
दृशाप्रतियोगित्वमेव प्रतियोगिताघटकसंबंधेन हेतुताघटकधर्मावच्छिन्नयादृशीप्रतियो-
गिताघटकधर्मावच्छिन्नानधिकरणं हेतुतावच्छेदकसंबंधावच्छिन्नातादृशाप्रतियोगित्वं॥

हेतुताघटकसंबंधावच्छिन्नं यादृशप्रतियोगिताघटकधर्मावच्छिन्नानधिकरण्यो हेतुताघटकधर्मा
वच्छिन्नातादृशप्रतियोगित्वं वा विवक्षितं ॥ अन्यथा उक्तरीत्यादोषात् ॥ अलग्नकेति ॥ न चाव्याप्य
वृत्ति हेतोप्रतियोगि वैय्यधिकरण्यविरहाद्धेतुताघटकसंबंधावच्छिन्नत्वमावश्यकं तथा च वि
वेन्हित्वभेदस्यारणान्नलग्नकत्वेति वाच्यं ॥ व्याप्यवृत्तिहेतुत्व निरोधेन हेतुताघटकसंबंधेन प्रतियो
गित्वसिद्ध्युपयोगितयातम विनार्थैव व्याप्यवृत्तिहेतोप्रतियोगिनावच्छेदकसंबंधेन प्रतियो
गिवैय्यधिकरण्यस्योक्तत्वात् ॥ यदि चोत्पत्तिकालावच्छेदेन वन्ह्यभावसत्वे धर्माभावस्याप्या
वश्यकतया केवलान्वयि साध्यकत्वं धर्मपदवृत्तित्वावच्छिन्नाभावस्य साध्यत्वे तु व्यभिचा
रित्वापातादित्युच्यते तदा द्रव्यत्वगुणत्वान्यतराभाववान् कर्मासमवेताभावादित्यादाव
व्याप्ति र्द्रष्टव्या ॥ सत्ताभावव्याप्यवान् जात्यभावादित्यादौ तु न दोषः सत्ताया एव सकल

गाग
२४

तन्निष्ठत्वादिति॥ न च तत्र विषयितासंबंधावच्छिन्नहेत्वभावसत्वाद्दलग्नकृतादुर्वारेति वाच्यं॥
ज्ञानान्यत्वविशिष्टवन्ह्यभावान्यत्वविशिष्टनिरूमव्याप्यत्वेन साध्ये ज्ञानान्यत्वविशिष्टवन्ह्य
भावान्यत्वविशिष्टवन्ह्यभावरूपहेतावव्याप्तेरुक्तत्वादिति केचित्॥ अत्रेति॥ ननु साध्यता
वच्छेदकावच्छिन्नाभावनिवेशकृत्ये द्रव्यत्वे साध्येपि हेत्वभावे प्रतियोगितावच्छेदकावच्छि
न्नवैयधिकरण्यपर्यन्तविवक्षाप्रयोजनमिति स्वरसोनुपपन्नः॥ सकलद्रव्यवृत्तित्वघ
टितरूपस्य गौरवेण प्रतियोगितानवच्छेदकत्वात्॥ इति चेन्न गुरुधर्मस्यापि प्रतियोगिताव
च्छेदकत्वात् विषयताविशेषस्यैव वा साध्यतावच्छेदकत्वात्॥ यदि चेह नो व्याप्यवृत्तित्वेन
तद्धेतुके प्रतियोगिवैयधिकरण्यमेव नास्तीत्युच्यते तदा घटो घटवृत्तित्वविशिष्टघटपटसं
योगात् परन्यवृत्तित्वविशिष्टघटपटसंयोगादित्यादौ प्रतियोगितावच्छेदकधर्मे निवेशफल

द्रष्टव्यं॥दीधितिकृतां द्रव्यत्वोपादानवैयर्थ्यं परिहरति॥द्रव्येतरेति॥द्रव्यवृत्तिमात्रे सकलद्रव्य
वृत्तिमात्रे च द्रष्टव्यं॥सत्तामादायानेकत्वसंभवात्॥अव्याप्तिरिति॥व्यासज्यवृत्तिधर्मानवच्छि
न्नप्रतियोगिताकत्वोपादानान्न संभवः॥इतीपीत्यपिरुक्तास्वरसमुच्चये॥नदेयमिति॥तथासति
गगनावृत्तिधर्मवान् द्रव्यत्वादित्यादौ अतिव्याप्त्यभावादिति भावः॥शब्दानुगममभिप्रेत्याह॥अ
न्नेषत्वरूपमिति॥तथा च साध्याभाववद्वृत्तयो यावन्तो धर्माः प्रत्येकं तत्तदधिकरणवृत्त्यभावप्रति
योगित्वमर्थः॥स्नेहादेः स्नेहवत्ताप्रकारकप्रमाविषयत्वादेः स्नेहाधिकरणत्वादेर्वा॥तेन नव्य
भिचारित्वापत्तिः॥निरुक्तेति॥धूमाभावस्य वह्न्यभावसमानाधिकरणोभयाद्यभावप्रति
योगित्वाद्व्याप्तिरतोऽवच्छेदकगर्भता॥वह्न्यभावस्य प्रमेयत्वादिना धूमाद्यभावव्यापकत्वा
दतिव्याप्तिरतोऽनवच्छेदकधर्मवत्त्वत्यागः॥यद्धर्मावच्छिन्नाभावः साध्याभाववन्निष्ठभेदप्रति

२५

योगितानवच्छेदकः इत्युक्तौ निर्धूमत्वव्याप्यवान् निर्वह्नित्वादित्यादावव्याप्तिरतो ऽत्यंताभावग
र्भव्यापकत्वप्रवेशः ॥ न च हेत्वभावप्रतियोगिवैयधिकरण्यव्यर्थं अव्याप्यवृत्तित्वाभिचारभा
वत्वस्य व्यापकतानवच्छेदकत्वात् ॥ गगनादेरलक्ष्यतामतेवृत्तिमत्वस्यैव निवेश्यत्वादिति वाच्यं ॥
सत्तावान् जातेरित्यादौ सत्ताभाववृत्तिकालिकसंबंधावच्छिन्नप्रतियोगिताकजात्यभावाभाव
सत्वादव्याप्तिरतो व्यापकताघटकाभावप्रतियोगिवैयधिकरण्यस्य निवेशनीयतया हेत्वभावे
तत्सार्थक्यात् ॥ अन्यथा एतद्वृक्षत्ववान् कपिसंयोगादित्यादावतिव्याप्तिः ॥ न चैवं वह्निमान्
धूमादित्यादौ साध्याभाववति कालिकसंबंधेन वृत्तेर्धूमस्य द्रव्यस्य प्रतियोगितावच्छेदकय
द्रव्याभाववत्वे तदवच्छिन्नानधिकरणवृत्तेः प्रतियोगितावच्छेदकधूमाभाववत्त्वमित्यव्याप्ति
रिति वाच्यं ॥ यद्धर्मावच्छिन्नानधिकरणं तद्भिन्नत्वस्यैव हेत्वभावत्वे निवेशनीयत्वात् ॥ न चैव

१ द्रव्यो वालादिभाववत्वे

मपि सत्तावान् जातेरित्यादौ साध्याभाववतः सामान्यादेः कालिकसंबंधेन हेत्वभाववत्त्वविशि
ष्टं यत्तु ध्वंसादिरितदनधिकरणस्य कालिकसंबंधावच्छिन्नजात्यभावाभाववत्वादव्याप्तिरि
ति वाच्यं॥ स्वरूपसंबंधेन प्रतियोगितावच्छेदकताघटकसंबंधेन वा स्वावच्छिन्नत्वनिवेशात्॥
स्वावच्छिन्नानधिकरणत्वं च प्रतियोगिमत्ताग्रहस्य हेतुमत्ताग्रहस्य वा विरोधिताघटकसंबंधे
न जात्यभावानधिकरणत्वेपि नाव्याप्तिः॥ यत्तु॥ व्यापकताघटकाभावप्रतियोगित्वमेवला
घवाद्धेतुमत्ताग्रहविरोधिताघटकसंबंधेन निवेश्यं न तु व्यापकतायां प्रतियोगिवैयधि
करण्यं॥ तेन हेत्वभावे प्रतियोगिवैयधिकरण्यमनादेयं॥ तन्न॥ द्रव्यत्वाभाववत्वान्संयोगिभेदादित्यादौ साध्याभाववन्निद्रव्ये संयोगिभेदाभावात्मनः संयोगस्य सत्वेपि अव्या
प्यवृत्तितया व्यापकताभंगवारणाय व्यापकतायां प्रतियोगिवैयधिकरण्यस्यावश्यक

राम ३६

त्वात्॥ एवं च वृक्षत्ववान् कपिसंयोगादित्यादौ हेत्वभावस्य प्रतियोगिवैय्यधिकरण्यगर्भसा
ध्यव्यापकतयाऽतिव्याप्तिरतः प्रतियोगिवैय्यधिकरण्यमभावे दर्शितं॥ न च वन्ह्यभाववान् धू
माभावादित्यादावतिव्याप्तिः॥ धूमाभावाभावत्वमपेक्ष्य धूमत्वस्यैव साध्याभावसमानाधिकर
णाभावप्रतियोगितावच्छेदकत्वादिति वाच्यं॥ गुरुधर्मस्यापि प्रतियोगियोगितावच्छेदकत्वात्॥
एतच्च दीधित्यनुसारेण॥ वस्तुतस्तु हेतुमत्ताग्रहविरोधिता घटकसंबंधावच्छिन्नयद्धर्मावच्छि
न्नाभावत्वावच्छिन्नाधिकरणतात्वं प्रतियोगिवैयधिकरण्यविशिष्टसाध्याभावव्यापकता
वच्छेदकं तद्धर्मवत्वं वाच्यं॥ तत्र व्यापकताघटकाभावे स्वरूपसंबंधेन वृत्तित्वं॥ अन्यथा का
लिकसंबंधेन वन्ह्यभावसमानाधिकरणधूमाभावाद्यधिकरणत्वाभावमादायाव्याप्तेः
यद्धर्मावच्छिन्नाभावत्वमात्रानिवेशे धूमरूपाभावमादायाव्याप्तेः॥ हेतुतावच्छेदकसंबं

ज॰ टी॰

२ सत्तावान् ज्ञाने इत्यादौ कालिकसंबंधावच्छिन्नजात्यभावाधिकरणत्वाभावः साध्याभाववद्वृत्तिसामान्यादौ न तोद्दव्याप्तिस्तदुक्तं संयोगेनैवेत्यर्थः॥

धेन साध्याभावाधिकरणवृत्तित्वोक्तौ सत्तावान् जातेरित्यादौ अव्याप्तिः॥ तथा च व्यापक
तावच्छेदकत्वाभावे च प्रतियोगिवैयधिकरण्यं न देयं॥ प्रोक्तसंबंधस्तु निवेश्यः॥ प्रयोजनं चो
क्तप्रायमेव॥ परे तु साध्याभाववद्वृत्तित्वस्य संबंधसामान्येन हेतुतावच्छेदकसंबंधेन वा प्रवेशो
क्तदोष इत्यतः साध्याव्यापकतावच्छेदकत्वं हेतुतावच्छेदकसंबंधावच्छिन्नाधेयतावदभावप्र
तियोगितावच्छेदकतासंबंधेन साध्याभाववदभाववत्त्वं सत्तावान् जातेरित्यादौ सामान्यादौ
हेतुतावच्छेदकसंबंधेन वृत्त्यप्रसिद्ध्यावपि द्रव्यत्वादेः प्रसिद्धेरत उक्तव्यधिकरणसंबंधे
न साध्याभाववदभावस्य जात्यभावत्वे सत्त्वान्नाव्याप्तिरित्याहुस्तन्न॥ तादृशसंबंधस्य
प्रतियोगितावच्छेदकत्वाभावाभावात्॥ अपरे तु॥ यद्रूपावच्छिन्नाभावत्वे स्वावच्छिन्नाभाव
वद्वृत्तिसाध्याभावाधिकरणताकत्वरूपत्वे व्याप्तिरिति निष्कर्षः॥ सत्तावान् जातेरित्या

॥ग्रसंबंधः॥

२५

द्रौ सत्ताभाववत्तायां जात्यभावत्वावच्छिन्नाभाववत्त्वस्य वृत्तेर्नाव्याप्तिरित्याहुः ॥ तत्तुच्छं ॥ यद्रूपा
वच्छिन्नाभावत्वावच्छिन्नाभावाधिकरणावृत्तित्वीयप्रतियोगितायां लाघवेन हेत्वधिकरणवृत्ति
तात्वमेवावच्छेदकं न तु तादृशाधारवृत्तितात्वं गौरवादित्यव्याप्तेर्दुर्वारत्वात् ॥ न चानिरुक्तवृत्तित्वत
स्यानवच्छेदकत्वेपि स्वनिरूपकतावच्छेदकत्वोपलक्षितधर्मावच्छिन्नाधिकरणवृत्तित्वत्वा
वच्छिन्नाभाववत्साध्याभावाधिकरणताकत्वस्वावच्छिन्नप्रतियोगिताकाभावाधिकरण
निरूपितायायावृत्तितातत्तद्व्यक्तित्वावच्छिन्नाभावकूटवत्साध्याभावाधिकरणताकत्व
मेववाव्यापकतावच्छेदकत्वं तेन प्रतियोगितावच्छेदककोटौ उपलक्षणतया भानानुपगमे
पि न क्षतिरिति वाच्यं ॥ तर्हि स्वाधिकरणावृत्तिसाध्याभाववत्त्वपर्यवसानेन तस्यैवव्याप्तित्वं
किं न रोचये ॥ यत्तु साध्याभाववदवृत्तित्वे हेतुतावच्छेदकस्वरूपान्यतरसंबंधेन ॥ तेन वह्नि

85

मानू धूमादित्यादौ कालिकसंबंधेन साध्याभाववद्वृत्ति धूमात्मकाभावमादाय नाव्याप्तिः॥ न वा सत्ताभाववान् जातावित्यादौ समवायेन साध्याभाववद्वृत्तित्वात्प्रसिद्धावपि क्षतिरिति तन्मन्दं॥ अन्यतरत्वेन संसर्गत्वानुपगमात्॥ उपगमे वा साध्याभावाधिकरणीयस्य हेतुतावच्छेदकसंबंधावच्छिन्नवृत्तित्वस्वरूपसंबंधावच्छिन्नवृत्तित्वान्यतरत्वस्य वा निवेशे पर्वतो वह्निमान् पर्वतानुयोगिकत्वविशिष्टकालिकसंबंधेन पर्वतत्वाभावादित्यादौ तादृशान्यतरातगतस्वरूपसंबंधेन पर्वतत्वाभावाद्यात्मकाभावस्य साध्याभाववद्वृत्तित्वेन व्यापकत्वानुपपत्तेः॥ अन्ये तु प्रतियोगिवैयधिकरण्यविशिष्टसाध्याभावाधिकरणयत्किंचिद्व्यक्तिवृत्तितानवच्छेदकान्यत्वमेव साध्याभावव्यापकतावच्छेदकत्वं॥ वृत्तिता च स्वरूपसंबंधेन॥ धूमवान्वह्नेरित्यादावतिव्याप्तिवारणाय यत्किंचिदिति॥ अत्र वह्निमान्धू

राम

३८

वाला दित्यादौ तौ वालाभाववत्वस्य प्रतियोगिवैयधिकरण्यविशिष्टवन्ह्यभावाधिकरण
यत्किंचिद्ध्रदत्वादिवृत्तितावच्छेदकं तयातिव्याप्तिस्तु न तस्य व्यभिचारनिरूपकीभूतयत्किंचि
द्व्यक्तिवृत्तितानवच्छेदकत्वात् ॥ वन्हिमान्पर्वतह्रदसंयोगादित्यादौ हेत्वभाववत्वस्य तादृश
ह्रदादिवृत्तितावच्छेदकत्वादिति व्याप्तिः ॥ हेत्वभावे प्रतियोगिवैयधिकरण्यसत्वेन वार
णीया ॥ एवं च वन्ह्यभाववान् धूमाभावादित्यादौ गुरुधर्मस्य प्रतियोगितानवच्छेदकत्वेप्या
धेयतावच्छेदकतया धूमाभावाभाववत्वस्य तादृशायोगोलकवृत्तितानवच्छेदकतया ना
तिव्याप्तिशंकापीत्याहुः ॥ विशिष्टेति ॥ साध्यवत्वेति ॥ वाक्यार्थमनुसृत्य लाघवेन लक्ष
णे साध्यावच्छिन्नभेदनिवेशात् ॥ प्रतियोगितावच्छेदकत्वांतलभ्यतायां व्युत्पत्तेर्हेतुतया
न हीत्यादिर्न हेतुरित्याशयेनाह ॥ यद्धर्मेति ॥ लघ्विति ॥ यद्धर्मविशिष्टबोधकपदा

ज.टी.

हू.

त्तरपंचम्युपस्थितप्रतियोगित्वेप्रकृत्यर्थतावच्छेदकतद्धर्मावच्छिन्नत्वसंसर्गेणैवतद्धर्मावच्छि
न्नप्रकृत्यर्थान्वयः॥ननुतद्धर्मवद्वृत्तित्वसंसर्गेणेतिसमासस्साधारणैवव्युत्पत्तिः॥अन्यथा
नीलोघटोघटादन्यइतिव्यवहारापत्तिः॥तदुत्तरत्वमदुत्तरत्वेनानुसंधीयमानत्वेलुप्तसा
धारणं॥लुप्तविभक्त्यर्थेप्रकृत्यर्थान्वयोनोपगम्यते॥तदस्मरणफलापलापापत्तेरिति
कथंचिदितिघटादन्यइत्यादौघटस्याधेयतासंबंधेनपंचम्यर्थप्रतियोगित्वेऽन्वयांतरम
पिस्मर्तव्यं॥तदव्यावृत्तीति॥तन्निष्ठभेदप्रतियोगितावच्छेदकस्यैवेत्यर्थः॥तेनविशिष्टस
त्तावान्गुणान्यइत्यादेर्वाप्रामाण्यं॥एवंचनीलघटत्वस्यपीतादिघटवृत्तित्वाभावेपि
नक्षतिः॥परेतुयद्धर्मावच्छिन्नाधेयतानिरूपिताधिकरणताप्रतियोग्यवृत्तिस्तद्धर्मा
श्रयस्यैवभेदानुयोगितावच्छेदकत्वमितिविवक्षितं॥अथैतादृशानियमेघटपटाभय

राम
३०

स्यैव यत्पदार्थतया घटत्वाद्यवच्छेदेन घटपटोभयभेदानुपपत्तिरिति चेन्न ॥ व्यासज्यवृत्ति
धर्मानवच्छिन्नप्रतियोगिताया एव तत्र प्रवेशात् ॥ नीलघटो घटान्य इत्यादौ पीतघटनिष्ठ
भेदप्रतियोगितावच्छेदकस्य प्रतियोग्यवृत्तित्वघटितनीलघटत्वत्वावच्छिन्नाधिकरणताक
स्य वा नीलघटत्वस्य पीतघटभेदानुयोगितावच्छेदकत्वमक्षतमिति ॥ यद्धर्मविशिष्टेत्यनि
यमोप्यावश्यक इति शिवं ॥ दीधितौ प्रतियोगिताकत्वं प्रतियोगिताकाभेदः स एव घटान्य
इत्यादावपि भासते ॥ अतो यत्र प्रतियोगिताकत्वस्याभाने तदपि दर्शयति ॥ घट इति ॥
प्रकृत इति ॥ वाक्यार्थमभिप्रेत्य नव्यैस्त्वादृशप्रतियोगिताकत्वस्यैव तात्पर्यतो भेदांशे
व्याप्तिघटकत्वोपगमात् ॥ विशिष्यैति ॥ विशेष्यता विशेषणता च ॥ तथा च पटाभावा
दिग्रहस्य घटत्वादिनिष्ठविशेषणतानिरूपितावच्छिन्नत्वनिष्ठविशेषणतानिरूपि

त्वप्रतियोगित्वनिष्ठविशेष्यताप्रतियोगित्वं॥ तेन तस्यावच्छिन्नत्वादौ पटत्वाद्यनिरूपित
त्वादिज्ञानप्रतिबध्यतासिद्धिः॥ वस्तुगत्यापटत्वावच्छिन्नत्वेनाज्ञायमानं॥ अनुभवसिद्ध
त्वात्॥ अनुभवविषय एव विषयतानुकूलत्वात्॥ अन्यथा॥ अवच्छिन्नत्वभानानंगीकारे॥ ने
स्यादिति॥ न चैष्टापत्तिः॥ एकघटवती घटांतरशून्ये घटो नास्तीति प्रतीतेः प्रमात्वापातादि
त्यग्रे व्यक्तीभविष्यति॥ स्वयमपीति॥ अथ वह्नित्वावच्छिन्नत्वस्य निर्युक्तिकानुभयमात्रे
णाभानकल्पनमनर्थकमिति चेन्न॥ वह्नित्वनिष्ठतत्संबंधावच्छिन्नप्रकारतावच्छेदकताक
ज्ञाने वह्नित्वनिष्ठतत्संबंधावच्छिन्नप्रतियोगितावच्छेदकत्वेनाभावज्ञानस्य प्रतिबंधकत्वं
अन्यथा समवायसंबंधेन वह्नित्वविशिष्टवत्ताज्ञाने सकलसंबंधेन वह्नित्वविशिष्ट
वत्ताज्ञाने सकलसंबंधेन वह्नित्वविशिष्टस्याभावज्ञानस्य प्रतिबंधकत्वप्रसंगात्॥

राम
४०

नचसंबंधावच्छिन्नवन्हित्वनिष्ठावच्छेदकतानिरूपितप्रतियोगितासंबंधावच्छिन्नप्रकारता
निरूपिताभावत्वावच्छिन्नप्रकारताशालिज्ञानत्वेन प्रतिबंधकत्वमितिवाच्यं तथासतिवन्हि
मत्ताज्ञानं प्रतिवन्हिघटोभयाभाववत्ताज्ञानस्य प्रतिबंधकत्वापातात्॥ नच प्रकारतावच्छेद
कतापर्याप्तिनतत्रघटत्वमात्रइतिवाच्यं॥ युक्तयुक्त्या प्रतियोगितायाअवच्छिन्नत्वस्याव
श्यकतयातत्र तदभानानुपगमेऽभावांशेवस्तुतः कालिकसंबंधावच्छिन्नवन्हित्वनिष्ठाव
च्छेदकतानिरूपकत्वाक्रांतप्रतियोगिताकत्वसंबंधेनसमवायेनवन्हित्वविशिष्टभानप्रस
ङ्गः॥ तद्वारणायप्रकारकतावच्छेदकताघटकसंबंधावच्छिन्नप्रतियोगितावच्छेदकता
कत्वभाननियमोपगमात्॥ अवच्छेदकभानसिद्धेः॥ नचतथाविधघटकसंबंधावच्छिन्ना
वच्छेदकताकत्वाक्रांतप्रतियोगितासंसर्गकत्वनियमेन तत्प्रसंगवारणमितिवाच्यं॥

संबंधावच्छिन्नावच्छेदकत्वस्याप्रामाणिकत्ववारणाय यदि क्वचित्प्रतीतौ तज्ज्ञानमुपेयते तेन स
सर्वत्र तज्ज्ञानमुपेय निर्विकल्पकोत्तरकाले वन्हिर्नास्तीति प्रत्ययानुपगमस्यैव सामग्र्यंतरकृ
त्वपनमपेक्ष्य——यत्वात्॥ अत एव च वन्हित्वस्यापि संसर्गमध्यप्रवेशः॥ अत एव धर्मांतरा
वच्छिन्नप्रतियोगिताकत्वसंबंधेन तद्धर्मावच्छिन्नस्य भानेपि अलीक[illegible]ानिर्वाहः॥ युक्ति
मप्याह॥ इत्यमेव चेति॥ शाब्देति॥ शब्दघटितनियमेन सामग्रीलाभाय॥ तेन प्रत्यक्षादे
रभावप्रतियोगित्वावगाहित्वोपगमेन निर्वाहेपि न क्षतिः॥ भ्रमत्वमिति॥ अवच्छिन्नत्वो
भाने घटाभावादेः प्रतियोगितासंबंधेन प्रमेयादिमत्तानत्प्रतीतेः प्रमात्वापत्तिरिति
भावः॥ संसर्गप्रकारेति॥ अत्र साधारणविशेषणतास्वीकारवैयर्थ्ये तस्या विशेषण
त्वानजन्यतावच्छेदकत्वेन तं विना संसर्गे विशेषणभानानुपपत्तेः॥ तद्व्याहत्ताया

राम
४१

स्तथात्वेतु तस्यामेव नानाभावः स्यात्॥ अस्माकं वदभाववति तत्संबंधावच्छिन्नतद्विषयता
कत्वभ्रमत्वमित्यत्र न कोपि दोषः॥ संबंधविशेषणताया अपि संबंधावच्छिन्नत्वादितिबो
ध्यं॥ अथापारमार्थिकमखंडं उक्तमेव संसर्गतयाभासतां नावतापि वास्तवतथाविधप्रति
योगित्वस्याप्रसिद्धिरेवेत्यत आह॥ सदिति॥ उपरागः संबंधः॥ सच तत्प्रतियोगिकत्वादिः॥
नचाप्रसिद्धौ तेपि ह्रदो वह्निमानित्यादौ तादृशसंबंध एव संसर्ग इति वाच्यं॥ यत्किंचिन्निष्ठप्र
तियोगिकत्वानुयोगिकत्वान्यतरविशिष्टस्यैव संसर्गतयाभाननियमः॥ तादात्म्यं च नास
न्निति न चासत्त्वं कालावृत्तित्वं तच्च गगनादिसाधारणं अप्रसिद्धमेवेति वाच्यं॥ नह्यसतो
नंगीकारः संभवं सिद्ध्यसिद्धिव्याघातात्॥ अपितु कालावृत्तित्वनियतस्वरूपत्वं तेन्द्रिय
तवस्तुमत्वं वासत्त्वमुपेयमिति॥ अर्थंतस्तन्निराससिद्धेः॥ एवं चासतः संसर्गमर्याद

याभानेन सिद्धिप्रसक्षादिति सत्प्रकारित्वादेः ॥ तत्संसर्गकत्वव्याप्यत्वादर्थतस्तन्निरासो
द्रष्टव्यः ॥ अन्वयितावच्छेदकत्वादिति पर्याप्तिनिवेशमपि भंजयति ॥ नीलइति ॥ मतान्तरमा
ह ॥ नीलेति ॥ अत्र सत्तान्यपृथिवीसमवेतभिन्नमित्याद्युपलक्षिताभावलिखनस्य पृथिवी
त्वे प्रतियोगितावच्छेदकत्वाद्यंगीकारं विनानुपपत्तेः ॥ दंडोपलक्षितपुरुषाद्यभावस्य सर्व
थादंडभिन्नपुरुषवतिप्रत्ययात्केवलपुरुषत्वावच्छिन्नप्रतियोगिताकस्य संसर्गत्वाभावात्क
थं घटत्वावच्छिन्नप्रतियोगिताकत्वमात्रं तथेति सूचनाय तत्कारः ॥ एवं च प्राक्पश्चाद्वानी
लेनीलत्वाभाववद्दशायां नीलो घटो नास्तीत्युपलक्षिताभावावगाहिप्रतीतिः सर्वदा
नीलघटवत्येवोपपद्यत इति दिक् ॥ संयोगेनेति ॥ प्रतियोग्यवृत्तिश्च धर्मो न प्रतियोगिता
वच्छेदकः प्रतियोगितावच्छेदकः प्रतियोगितानवच्छेदकं साध्यतावच्छेदकमित्यादौ प्रति

योग्यन्वयः॥ साध्याभावश्च साध्यतावच्छेदकसंबंधेनेत्यादौ तृतीयार्थश्चाग्रे तत्र तत्र वाच्य इ
ति ग्रंथलाघवाय प्रसंगात्रैवोक्त इति बोध्यं॥ संसर्गीति॥ पदार्थः पदार्थेनैवान्वेति निनत्वपदा
र्थेनेति व्युत्पत्तेः॥ नन्वस्वाश्रयीभूतप्रतियोगिताकत्वसंबंधेनाभावेऽवच्छिन्नत्वान्वयः॥
अननुभवात्॥ संयोगावच्छिन्नप्रतियोगितावान् घटाभाव इति बोधः॥ बहुपदार्थविषय
कत्वेन गौरवादत्स्याह॥ प्रतियोगितामात्रेवृत्ति॥ एवं घटत्वावच्छिन्नप्रतियोगितायां संयो
गावच्छिन्नत्वाभाने॥ विशिष्टेति॥ संयोगघटितसामानाधिकरण्यसंबंधेनेत्यादि॥ नस्य
द्रव्यत्वाभावतया समवायावच्छिन्नप्रतियोगि योगिताकत्वे घटाभावतया घटत्वावच्छिन्न
प्रतियोगिताकत्वं घटाभावतया घटत्वावच्छिन्नप्रतियोगिताकत्वं चैव नादुक्तं॥ पर्वतेन च स
मवायेन वह्निर्नास्तीति प्रतीतेर्यत्किंचित्संबंधावच्छिन्नघटाभाव एव विषय इति भावः॥

समवायोऽति॥ प्रतियोगितैक्यं भानं पश्चात्त्वमेवेति भावः॥ द्वेधाप्रतियोगित्वभानासहिष्णु
राह॥ अथवेति॥ नन्वेवमपि समवायेन कपाले घटो नास्तीति प्रत्ययापत्तिः॥ संयोगसंबं
धावच्छिन्नघटत्वावच्छिन्नप्रतियोगिताकाभावसत्वात्तत्र समवायावच्छिन्नप्रतियोगिताकत्वसत्वा
दित्यत आह॥ ततीयान्तेति॥ उत्तरेति॥ पूर्वपदार्थाविशेषितस्वोत्तरपदार्थान्वयित्वेत्यर्थः॥ नील
घटान्यस्येति॥ नीलघटान्यो घट इत्येव बोधः स्यात्॥ ननु घटो नीलघटान्य इति यन्निष्ठप्रति
योगिताकत्वेनेति व्युत्पत्तिविरोधात्॥ नन्वनधिकरणमिति॥ प्राथमिकसमासे लक्षणा
कल्पनं न युक्तं॥ तथा सति तत एव विवक्षितार्थबोधनिर्वाहात्॥ पश्चात्समासान्तरवैयर्थ्या
त्वघटस्यानधिकरणमितीत्यनन्तरं तादृशबाधवारणाय निर्विभक्तिकघटादिपद एव तात्पर्य
ग्राहकलोपगमसंभवादित्यत आह॥ वस्तुत इति॥ ससंबंधिकत्वस्यार्थस्या[illegible]त ज्ञि

राम
४३

ञास्य पदार्थांतरकत्वं ननु स्वार्थैकदेशसाकांक्षपदार्थांतरकत्वं घटान्वितस्यैवाधिकरणादेरिति
दर्शनात्॥ नव्यास्तु त्रिपदतत्पुरुषेऽनुशासनमपश्यंतो घटाधिकरणपदयोः समासोत्तरे तत्र
समासः॥ एवं प्रतियोगितावच्छेदके साध्यावधि॥ नञ्‌ मध्यनिवेशात्साधुतेत्याहुः॥ तन्न॥ न
ञो मध्यपातेऽनुशासनाभावात्॥ प्रयोगानुरोधेन कल्पने च तादृशासमासा ऽनुशासनस्यैव क
ल्पनौचित्यात्॥ पर्याप्त्युपादानप्रयोजनांतरमाह॥ पीतेति॥ यद्धर्मविशिष्टबाधकेति॥ दर्शि
तव्युत्पत्तेः पीतत्वशंखत्वविशिष्टाप्रसिद्ध्याबाधमात्रं क्ववैसानिकं वैशिष्ट्यं निवेश्य संचार
यति॥ यद्धर्मेति॥ यद्धर्मपर्याप्तप्रकारतावच्छेदकताकेत्यर्थः॥ घटो नास्तीति॥ इदमुपल
क्षणं॥ नीलघटो नास्तीत्यादौ प्रतियोगिवृत्तिता पन्नयोः नीलत्वघटत्वयोरवच्छेदकताप
र्याप्तिः॥ इह त्वन तथाभूतयोः पीतत्वशंखत्वयोः सेत्यपि द्रष्टव्यं॥ अप्रसिद्धेनैवेति॥ अप्र

सिद्धस्य संसर्गतायाः पूर्वं दूषितत्वेपि तत्कथनं भ्रमत्वोपपादनायेवेति वाच्यं ॥ ननु विषयतादो
पीतः शंखत्वावच्छिन्नत्वप्रसिद्धिः ॥ तस्यान्याद्दृशतयाऽकिंचित्करत्वादिति सूचनाय चकारः ॥ जा
तिमान्नास्ति पीतः शंखवान्नास्तीत्यादौ अवच्छिन्नप्रतियोगितावच्छेदकत्वादिति वैचित्र्यमु
त्पादयति ॥ बहुतरमिति ॥ इति प्रकाशिकापंचलक्षणी टिप्पणी ॥ ॥ यद्यपि साध्यासमानाधि
करण्यपदस्य समानमधिकरणं यस्य स तथा तस्य भावः समानाधिकरण्यं तस्याभावोसा
धिकरण्यं साध्यस्यासामानाधिकरण्यमिति विग्रहः ॥ तत्र समानपदस्य समानाधिक
रणे लक्षणा ॥ अन्यथाऽव्ययीभावोत्तरपदार्थेन साकं तत्समासाप्रविष्टपदार्थान्वयस्या
व्युत्पन्नतयाऽधिकरणेन साकं साध्यपदार्थान्वयानुपपत्तेः साध्यपदतात्पर्यग्राहकं ॥ एवंच
साध्याधिकरणवृत्तित्वाभाववानधिकरणत्वं लक्षणं तस्य द्वंसत्वादित्याहावतिव्याप्तिः ॥

राम
४४

तथापि समानमेव सामानं साध्यस्य न सामानं साध्यासामानं तदधिकरणं यस्य स तथा तत्
स्य भावः साध्यासामानाधिकरण्यमिति व्युत्पत्त्या साध्यवत्वावच्छिन्नभेदवद्वृत्तित्वा न धिक
रणत्वमर्थो लभ्यते तदुपेक्षा कुतइत्याशंकायां बीजमाह ॥ साध्यासमानेति ॥ असमानाधि
करणपदस्य न समानं असमानं अधिकरणं यस्येति व्युत्पत्त्या समानपदस्य द्वौ वा ल्लाघवा
धिकरणपदतया साध्यसमानाधिकरणं यस्य स्यस्य यदधिकरणभिन्नाधिकरणक
साध्यं तत्त्वमित्यर्थः ॥ समानमधिकरणं यस्य समानाधिकरणः न समानाधिकरणोः
असमानाधिकरण इति वा व्युत्पत्ति ॥ तथाच तस्य साध्यं यत्समानाधिकरणभिन्नं तत्त्व
मित्यर्थः ॥ उभयत्रापि दोषमाह ॥ वह्निमात्रस्यैवेति ॥ यद्यपीति ॥ तथाचसमानाधिकर
णपदं प्रथममेव व्युत्पत्तिः परं तु न अर्थः धिकरणपदार्थस्य प्रतियोगितयान्वय इति भावः ॥

अनधिकरणमित्यस्य साध्याधिकरणमित्यभिन्नेत्यर्थः॥ यस्येति न तात्पर्यग्राहकमित्या
न्नायेनाह॥ यस्येति॥ न च यदधिकरणानधिकरणमिति समासस्य यदधिकरणनिष्ठभेदप्र
तियोग्यधिकरणकमित्यर्थः॥ न त्वयमिति वाच्यं॥ एतस्य तद्विग्रहार्थत्वात्॥ यथा साध्य
निष्ठाधेयत्वानिरूपाधिकरणवृत्तित्वमित्येव साध्यासमानाधिकरण्यपदस्य बहुव्रीहि
गर्भबहुव्रीहिरूपस्य विवरणं साध्यसमानाधिकरणं यस्येति तु विग्रहः॥ विवरणविग्रहीय
माणपदयोस्तथाभावनिर्वाहायोक्तः साध्यासमानाधिकरणपदस्यान्यादृशार्थकत्व

राम ४५

प्रसंगवारणाय यदधीति विग्रहविवरणं॥ तत्रापि चाक्षरतस्तथात्वनिर्वाहाय स्वयं बहु
व्रीहिगर्भबहुव्रीहिविग्रहार्थः सूचितः॥ विग्रहार्थानां च न लक्षणघटकत्वमिति॥ इ
दं तु बोध्यं॥ साध्यस्यासामानाधिकरण्यमिति तत्पुरुषं परित्यज्य साध्यमसमानाधि

करणं यस्य यद्धिकरणानधिकरणसाध्यमित्यर्थो वर्णितो तद्दुष्टं तु न द्रव्यं सत्वादित्या
दिव्याप्यवृत्तिः सामानाधिकरण्यस्य व्याप्यवृत्तितया तदसंभवात्॥ प्रथमकल्पांगीकारस्ये
व निरर्थकत्वात्॥ न च व्यावर्तक द्वितीयकल्पलाभार्थं प्रथमकल्प आदृतः॥ तथा च बहु
व्रीहिपक्षे साध्यमसमानाधिकरणं॥ यस्येति व्युत्पत्त्या साध्यनिष्ठाधेयत्वानिरूपको
धिकरणवृत्तेरन्यपदार्थस्य निरूढलक्षणयैव लाभः॥ तत्पुरुषोपगमे तु असामाधिक
रण्यपदस्य विवक्षितार्थकत्वमाधुनिलक्षणयैवेति तदुपेक्षेति वाच्यं॥ बहुव्रीहौ च र
मपरलक्षणायाः समस्यमानपदार्थसंबंधित्वेनान्यपदार्थबोधकत्वेनैव निरूढत्व
स्य कुप्तत्वाद्यथा विवक्षितरूपेणान्यपदार्थबोधने निरूढत्वभंगात्॥ अन्यथा स
र्वत्रातिप्रसंगात्॥ आधुनिलक्षणोपगमे तु तत्पुरुषोपक्षा निर्बीजेति॥ अत्र वदंति॥

ज.टी.

मू.

द्रव्यं सत्वादित्यत्राति व्याप्तिं वारयितुमेव प्रथमकल्पादरः॥ तत्र साध्यं यदधिकरणवृत्तिभिन्नमि
तिनार्थः॥ किंतु यदधिकरणीभूतयत्किंचिद्व्यक्तिभिन्नमित्येव॥ तथा सति सत्राधिकरणगुणा
दिरूपयत्किंचिद्व्यक्तिमादाय नातिप्रसंगः॥ न चैवं विशिष्टसत्तावान् सत्वादित्यादावतिव्याप्तिः
विशिष्टसत्तानतिरिक्तत्वादितिवाच्यं॥ साध्यतावच्छेदकावच्छेदेन तादृशयत्किंचिद्व्यक्तित्वा
भावविवक्षणादिति॥ नव्यास्तु साध्यमसमानाधिकरणं यस्येति कल्पे स्वानधिकरणाधि
करणाधिकरणस्य स्वाधिकरणसामान्यवृत्तिभिन्नस्य वा समानाधिकरणपदार्थत्वात्॥ द्रव्यं
सत्वादित्यस्य नव्याप्तिरित्यत आह॥ यदधीति व्याचक्रुः॥ ग्रंथकारस्तु न तथा तत्पदार्थक
ल्पस्याव्यावर्त्तकतामेवालोच्य तथा नोट्टंकितवानिति सर्वं रमणीयं॥ प्रतियोगित्वस्यैव
जातीयताविरहात्संबंधप्रतियोगित्वेऽभावीयत्वबाधः॥ अभावप्रतियोगित्वप्रवेशे तु

रामू
छ्पू

९२

नचसाध्यनिष्ठाभावप्रतियोगिवृत्तित्वविवक्ष
त्वतिव्याप्तिरित्याशंकते॥नचेति॥साध्येति॥नचसाध्यतावच्छे
येवातिव्याप्तिवारणात्कृतंतन्निरूपकाधिकरणविवक्षयेतिवाच्यं॥यतोवृत्तित्वंनसाध्यतावच्छे
दकसंबंधेनघटभिन्न
दकसंबंधेनवन्हिमान्द्रव्यत्वादित्यादावतिव्याप्तेः॥नापिहेतुतावच्छेदकसंबंधेनद्वि
पटत्वादित्यादावव्याप्तेः॥यथोक्तविवक्षणेतुप्रथमंवृत्तित्वंसाध्यतावच्छेदकसंबंधेनद्वि
तीयंतुहेतुतावच्छेदकसंबंधेनेत्यदोषः॥नन्वेतद्विवक्षयैवद्रव्यंसत्वादित्यादावतिव्याप्ति
वारणेऽग्रिमविवक्षानुसरणंव्यर्थमित्यतआह॥वस्तुतइति॥यद्वायथाश्रुतेन्निवेशरक्षना
र्थमाह॥वस्तुतइति॥नचसामानाधिकरण्याभावइत्याधिकं॥समानाधिकरण्याभावए
वलक्षणघटकस्तत्प्रतियोगितायाःसामानाधिकरण्यप्रतियोगिवृत्तित्वसिद्धयेतस्यसामा
नाधिकरण्यसंबंधेनाभावरूपताकथनात्॥किंचितुअसामानाधिकरण्यप्रतियोगित्वं

93

सामानाधिकरण्ये एव तदधिकरणत्वं च स्याश्रयाश्रयत्वसंबंधेनेत्याहुः ॥ तद्दसत्त्व ॥
साध्यता वच्छेदक संबंधावच्छिन्नवृत्तित्व एव तत्प्रतियोगित्वं न तु हेतुतावच्छे
दकसंबंधावच्छिन्नवृत्तित्वेद्रव्यत्वतिव्याप्तिर्दुर्वारत्वात् ॥ अव्याप्तिरिति ॥ जलावच्छेदेन पृथि
वीत्वसामानाधिकरण्याभावस्य द्रव्यत्वे सत्वादिति भावः ॥ व्याप्यवृत्तित्वेनेति ॥ तथा च सत्तासामा
नाधिकरण्याभावस्य द्रव्यत्वे सत्वादिति भावः ॥ कल्पांतरावतारनिर्वाहः ॥ अथाद्यकल्पद्व
ये द्रव्यसत्वादित्यस्याव्याप्तिः प्रदर्शिता ॥ एतत्कल्पे तु तत्राव्याप्तिरतः सामानाधिक
रण्यस्याव्याप्यवृत्तित्वमुपेयं ॥ तथा च द्रव्यं पृथिवीत्वादित्यादौ अव्याप्तेरनुद्धार एवेत्यत
आह ॥ एतदिति ॥ ननु साध्यासामानाधिकरण्यशब्दे बहुव्रीहिस्वीकारेपि साध्यनिष्ठा
सामानाधिकरण्यप्रतियोगित्वं च लभ्यत एव ॥ गर्भबहुव्रीहेरधिकरणनिष्ठभेदप्रति

राम

योगितावच्छेदकाधिकरणताकार्थकतायादिधीतिकृद्भिरेवोक्तत्वात्सत्वं॥ साध्येऽसामाना
धिकरण्यंयस्येति॥ व्यधिकरणबहुव्रीहेः स्वीकारात्॥ नचतथापिसाध्यनिष्ठासामानाधि
करण्यप्रतियोगिनएवंलाभःस्यादितिवाच्यं॥ भावप्रधाननिर्देशादुपपत्तेः॥ विषमव्याप्ते
ति॥ साध्यनिष्ठाभावप्रतियोगितावच्छेदकस्वावच्छिन्नसामानाधिकरण्यत्वकधर्मान्यहे
तुतावच्छेदकधर्मवत्वमर्थः॥ अन्यथाआर्द्रेधनप्रभववह्निमान्धूमादित्यादौधूमसामा
नाधिकरण्यघटोभयाभावादिकमादायाव्याप्तेः॥ नचैवंसाध्यनिष्ठाभावीयसामानाधि
करण्यसंबंधावच्छिन्नप्रतियोगितावच्छेदकधर्मान्यहेतुतावच्छेदकवत्वंद्वितीयकल्पार्थः॥
तथाचसामानाधिकरण्याभावकृत्यभिधानमधिकमितिवाच्यं॥ तस्यसाध्यनिष्ठस्वावच्छि
न्नसामानाधिकरण्यत्वावच्छिन्नाभावप्रतियोगितावच्छेदकधर्मान्यत्वघटितलक्षणाभि

प्रायकत्वात्॥ धूमस्तस्यार्द्रेंधनजवह्निनिष्ठाभावप्रतियोगितावच्छेदकतयाः व्याप्तिरतःसा
मानाधिकरण्याभावनिवेशः॥ सामानाधिकरण्यसंबंधेनेतिच प्रतियोगितावच्छेदकत्वक
थंतावारणायनतुलक्षणघटकवैयर्थ्यात्॥ यत्तुसाध्यनिष्ठाभावप्रतियोगितायानिरूप
कतासंबंधेनावच्छेदकयदधिकरणंतद्वृत्तित्वमर्थः॥ तेनद्रव्यंसत्वादित्यादौनातिव्याप्ति
रितितन्न॥ सामानाधिकरण्याव्याप्यवृत्तित्वाबलंवादेवनदतिव्याप्तिनिरासादौदृशो
दृश्यस्यव्याख्यायानिर्बीजत्वात्॥ समव्याप्तेपिसंख्यावान्परिमाणादित्यादौतत्तद्घटप
टावृत्तित्वाभावमादायव्याप्तिसंभवाद्विषमव्याप्त्यनुधावनस्यनिर्बीजत्वापातेश्च॥
विषमव्याप्तेस्यस्यतद्विशेषस्यर्थः॥ स्वावच्छिन्नासमानाधिकरणप्रकृतसाध्यकहेतु
तावच्छेदकाश्रयसामान्येवृत्तियावत्॥ तेनद्रव्यंपृथिवीत्वादित्यादावव्याप्यभावेपि

नक्षतिः ॥ वह्निरयः पिंडीयः ॥ साध्यनिष्ठाधेयत्वेति ॥ यदधिकरणमनधिकरणयस्ये
तिव्युत्पत्तेरधिकरणपरस्याधेयतानिरूपकार्थकतया साध्यं यदधिकरणनिष्ठभेदप्रति
योगितावच्छेदकाधिकरणताकाधेयतावदित्यर्थकतया बहुव्रीहिवशात् साध्यनिष्ठा
धेयत्वानिरूपकाधिकरणवृत्तित्वलाभः ॥ विपरूप्रयुक्तविशेष्यविशेषणभावविपरीत
तत्प्रयोजकत्वाद्बहुव्रीहेः ॥ ननु साध्यनिष्ठाधेयत्वानिरूपकाधिकरणवृत्तित्वमित्यत्रा
धिकरणपदमधिकं ॥ किंच वह्निनिष्ठद्रव्यत्वावच्छिन्नाधेयतानिरूपकत्वसाधारणाधे
यतानिरूपकत्वसामान्याभावोऽप्यस्यैव तत्र हेतुतावच्छेदकसंबंधेन स्वप्रसिद्धेरव्याप्तिः ॥
सत्तावान् द्रव्यत्वादित्याद्यव्याप्तिवारकनिष्कर्षे तु धूमवान् वह्नेरित्यादावतिव्याप्तिः ॥
यत्तु साध्यनिष्ठाधेयतात्वसमनियतनिरूपकत्वं विवक्षितं ॥ तच्च स्वव्यापकसाध्य

निष्ठधेयतात्वव्यापकनिरूपकत्वं॥ नस्यस्वाश्रयनिरूपिताधेयत्ववत्वंसंबंधः॥ आधेय
तात्वस्यनुसाध्यानुयोगिकत्वविशिष्टस्वाश्रयाश्रयत्वं॥ तन्न॥ तथासतिआभासेमहागो
रवाभिधानासंगतेः॥ इदंतुबोध्यं॥ साध्यतावच्छेदकव्यापकाभावप्रतियोग्याधेयता नि
रूपकाधिकरणवृत्तित्वमाभासलक्षणं॥ तत्रेंधनादिवृत्त्याधेयताविशेषाभावस्यवन्हि
सामान्यवृत्तित्वादव्याप्तिरतः स्वावच्छिन्नसामानाधिकरण्यत्वसमव्यापकताद्दशाभावप्र
तियोगिताकत्वंवाच्यं॥ धूमसामानाधिकरण्यघटोभयाभाववारणायसमपदं॥ सामानाधि
करण्यत्वव्याप्यत्वंचविशिष्यनिवेश्यं॥ तेनताद्दशप्रतियोगितायाघटादिसाधारण्येपि
नक्षतिरित्याशयेनमहागौरवमभिहितं॥ तदयुक्तं॥ ताद्दशप्रतियोगितावच्छेदकस्वा
वच्छिन्नसमानाधिकरण्यत्वकत्वपक्षेऽदोषात्॥ अत्रेदंसमाधानंसाध्यनिष्ठाधेयत्व

राम
४९

निरूपकाधिकरणान्येति॥ विवक्षणीयं॥ अखंडाभावघटतयाऽधिकरणपदस्य न वैयर्थ्यं॥
यद्वाऽधिकरणपदोपसंदानात्॥ साध्यनिष्ठाधेयतानिरूपकं यद्यत्तत्तद्भेदकूटं निवेश्यं॥
अन्यथाधिकरणभेदेन निरूपकताभेदाद्वह्निमान् धूमादित्यादावव्याप्तेः॥ निरूपकता
भेदे नैव चाधेयताभेदान्न पूर्वपक्षावतार इति॥ यद्वा अधिकरणपदं विलक्षणानिरूपकत्व
निवेशाव्यंजनाय॥ अन्यथा वह्निमान्वह्न्यधिकरणत्व महानसोभयत्वादित्यादौ हेतुमतः
वह्निरस्याधेयतानिरूपकत्वादतिव्याप्तेः॥ केचित्तु॥ साध्यनिष्ठाधेयत्वानिरूपकाधिक
रणत्वाभाववेत्यर्थः॥ तादृशानिरूपकत्वाभावमात्रप्रवेशे तु वह्निमानित्यादव संभवः॥
आधेयत्वाधिकरणयोरधिकरणतामंगीगर्भाव्यैव निरूपकाभावेनाधिकरणमाधेय
तानिरूपकमिति व्यवहारोपपत्तो साध्यवतः साक्षात्साध्यनिष्ठाधेयतानिरूपकत्वस्य॥

प्रामाणिकत्वात्॥ निरूपकाधिकरणपदे चैकपदेन्नोऽधिकरणत्वेनिरूपकत्वान्वयेनोक्तार्थ
लाभः॥ साध्यानिष्ठधेयत्वानिरूपकत्वस्याधिकरणत्वान्वयेतु असंभवः॥ अधिकरणता
भेदएवाधेयताभेदकः अधिकरणभेदभिन्नइत्याद्युः॥ साध्यतेति॥ यत्किंचित्संबंधानि
वेशेतु वन्हिमान्धूमादित्यादावव्याप्तिर्बोध्या॥ संबंधसामान्येनरूपनिष्ठाधेयतानि
पकेप्रलयेकालत्वसत्वान्नातिव्याप्तिरतोमहेति॥ एतच्चजन्यरूपत्वेनसाध्यत्वेरूपत्वे
नसाध्यत्वेतु तत्पदेतदेयमेव॥ महाकालस्यैवकालिकसंबंधेनाधिकरणत्वमुपाधी
नांत्वावच्छेदकत्वमितिमतेपिउपाधीनांरूपनिष्ठाधेयतानिरूपकत्वात् अत्रनहेतु
तावच्छेदकसंबंधेनवन्हित्वनिवेशः॥ किंतु हेतुताघटकसंबंधावच्छिन्नरतित्वा
यत्स्वरूपसंबंधावच्छिन्नरतियोगिताकस्वमभावमित्यतआह॥ किंनेति॥ सा

ध्यनिष्ठत्वी ति ॥ अथोक्तसंबंधे हेतुतावच्छेदकधर्मावच्छिन्नीयहेतुताघटकसंबंधावच्छिन्न
धिकरणीयत्वमेव विशेषणं उक्तदोषवारणाय निवेश्यं ॥ वन्हित्वे हेतुताघटकसंबंधावच्छिन्न
त्वहेयं व्यर्थत्वात् ॥ तथाचपुच्छविपर्ययवैयर्थ्यं ॥ नचविशेषरूपेण संसर्गतायां मानाभावइ
तिवाच्यं ॥ सिद्धांतलक्षणे वृत्तिनियामकसंबंधेन गगनादेः पृथिवीत्वाद्यव्यापकत्वालि
खनेन विशेषरूपेण संसर्गतायाः अवश्यकत्वात्मैवं ॥ तदप्रामाणिकत्वाभिप्रायेणापु
छविपर्यासात् ॥ व्यापकत्वं त्विति ॥ यद्यपिप्रतियोगिवैय्यधिकरण्याघटितव्यापक
त्वनिवेशोसत्तावान् जातेरित्यादौजात्यधिकरणत्वाभावस्य यः कालिकसंबंधावच्छि
न्नाभावस्तस्य साध्यनिष्ठाधेयत्वानिरूपकाधिकरणवृत्तित्वादव्याप्तिः ॥ तथापिहे
तुताघटकसंबंधेन विशिष्टहेतुमत्तायहविरोधिताघटकसंबंधेन व्यापकत्वोपादे

न्न दोषः॥ अथ संयोगत्वनिरुक्तौ व्यापकतायाः प्रतियोगिवैयधिकरण्यघटितत्वं भज्यते
ति चेत्तत्र द्रव्यत्वाभाववान्संयोगिभेदादित्यादौ हेत्वभाववत्त्वेनापि संयोगस्याव्याप्यवृत्तित
या न साध्याभावव्यापकत्वमित्यव्याप्तिवारणाय व्यापकतायां तन्निवेशः। उक्तहेतु संयोगि
भेदाधिकरणत्वाभावस्याव्याप्यवृत्तितया तद्वैयर्थ्यं बोध्यं॥ आद्ये धनञ्जन्यवन्ह्यधिकरण
ताव्यक्त्यभावस्य तादृशानिरूपकत्वात्॥ गगनानुधावनवैयर्थ्यं तु न वाच्यं एकधर्मावच्छि
न्नाधिकरणतायाः एकसमित्याभिप्रायेण गगनपदोपादानात्॥ उभयत्वादीत्यादिना यो
गोलकान्यत्वविशिष्टान्यत्वविशिष्टनह्यधिकरणत्वाभावपरिग्रहः॥ सामान्यपदमि
ति॥ तथा च तादृशाकरणतात्वावच्छिन्नाभावः॥ वैशिष्ट्यपस्यासज्यवृत्तिधर्मानवच्छिन्न
तादृशाधिकरणतात्वावच्छिन्नाभावो वा निवेश्यः॥ अनवच्छिन्नत्वं चाखण्डभेदः इति

भावः ।। ननु सामान्यं समभिव्याहृतपदार्थतावच्छेदकव्यापकत्वं उक्तदोषानुद्धारात् ।। ननु
व्यापकत्वं च न तत्समानाधिकरणात्यंताभावाप्रतियोगित्वं ।। धूमाधिकरणत्वाभावस्याभ
याव्यभावमादायासंभवात् ।। नापि तत्समाधिकरणभेदप्रतियोगितानवच्छेदकत्वं ।। ए
तद्वृत्तित्ववान्कपिसंयोगादित्यादौ हेत्वधिकरणत्वाभावस्य केवलान्वयितयाऽतिव्या
प्तेरित्यत आह ।। तथा चेति ।। सामान्याभावत्वेन व्यापकत्वमिति नियोजना ।। सामान्याभाव
त्वेन तत्समानाधिकरणात्यंताभावप्रतियोगितानवच्छेदकत्वमित्यर्थः ।। तेनैतद्वृत्तित्ववान्क
पिसंयोगादित्यादौ नातिव्याप्तिः ।। कपिसंयोगाधिकरणत्वाभावाभावस्य कपिसंयोगा
त्मकाधिकरणत्वात्मनः साध्यनिष्ठाधेयत्वानिरूपके वृक्षान्तरे सत्वादिति ।। द्रव्यस
त्वादित्यादौ विशिष्टसनाधिकरणत्वाभावत्वस्य साध्यनिष्ठाधेयत्वानिरूपकत्वसमा

ज॰ टी॰

रु॰

नाधिकरणाभावप्रतियोगितानवच्छेदकत्वादिति व्याप्तिरतः यद्धर्मानिवेशः॥ हेतुतावच्छेदकसंबंधनिवेशप्रयोजनमाह॥ तेनेति॥ कालिकसंबंधेनेत्याद्यधिकरणतावच्छिन्नत्वं तृतीयार्थः॥ यत्किंचित्संबंधावच्छिन्नाधिकरणतानिवेशे तु समवायेन वह्निमान् संयोगेन वह्नेरित्यादाववतिव्याप्तिर्बोध्या॥ ननु व्यापकत्वं तत्समानाधिकरणात्यंताभावप्रतियोगितानवच्छेदकधर्मवत्त्वमेवास्त्वित्यत आह॥ नवेति॥ व्यधिकरणसंबंधावच्छिन्नप्रतियोगितावच्छेदकधर्मवत्त्वमेवास्त्वित्यत आह॥ नवेति॥ व्यधिकरणसंबंधावच्छिन्नत्वभावमादायातिव्याप्तिवारणाय हेतुतेति॥ निर्वह्नित्वहेतुकव्याप्तिवारणासंभावत्वेनेति॥ तत्स्यनियामकसंबंधस्य हेतुत्वमेवोपेयते न तु तदवच्छेदकसंबंधत्वमिति यदि ब्रूयात्तदाप्याह॥ किंचेति॥ पूर्वलक्षणेषु एवरूपादेः सद्धेतुतानेहेति भावः॥ अव्याधिकरणहात्रवेशे पक्षधर्मताज्ञानविरहादेवानुमित्यनुत्पादनिर्वाहात्॥ रूपस्यआ

राम

५२

प्यत्वस्वीकारास्तुनयुक्तः यतः व्यापकतारारीरेतद्वृत्तित्वेहेतुतावच्छेदकसंबंधावच्छि
न्नत्वस्य निवेशोसत्तावानद्रव्यत्वेदित्यादावव्याप्तिर्द्वयोरैत्यधिकरणतानिवेशास्तथा
सतिस्वरूपसंबंधावच्छिन्नत्वनिवेशान्नदोषः॥रूपेस्याव्याप्यत्वं वास्तु॥भूत्यनाकुलप्रा
गुक्तस्येति॥अर्थोर्यमाणः॥ज्ञानान्वयिजन्यत्वं ज्ञानजन्यत्वं वासंबंधः पत्ययः॥२
तीयार्थोभेदः॥ज्ञानजन्यकत्वं ज्ञानजनकज्ञानविषयत्वं वार्थपदोत्तरषष्ठ्यर्थः संबंधः॥
तदानुपूर्वीभिन्नतदानुपूर्वीविषयताप्रयोज्यार्थविषयताप्रयोजकविषयतावदानुपूर्व्य
वच्छिन्नवृत्तियावत॥मूले तु तदुभयमपि साध्यानधिकरणानधिकरणत्वमित्यत्र तदु
भयशब्दबोध्यं॥तादृशानधिकरणत्वद्वारा बोध्यमित्यर्थः॥प्रबोधनादिति॥पूर्वोक्ता
दृस्याधिकरणतात्रयघटितत्वादनुवादस्याधिकरणताद्वयघटितत्वादिति भावः॥

प्रकृतेति॥पुरोधावरूपेत्यर्थः॥द्वितीयपुरोवादस्यसाध्यसद्व्यदनधिकरणंतद्वृत्तित्वाभाव
एवेत्येतिपूरणीयंकचित्तथापाठोपिअनुवादतउक्तार्थलाभंस्फुटीकरोति॥इत्यादाविग्र
हेनाअधिकरणानधिकरणेत्यस्यविग्रहः॥व्यत्यासोन्यत्रानुसंधानं॥तथाचासाध्याधि
करणानधिकरणत्वमसाध्यानधिकरणाधिकरणत्वंइतिविवक्तव्येसाध्यानधिकरणा
नधिकरणमित्युक्तं॥अतएवाशयइति॥साध्याधिकरणानधिकरणत्वशब्देअधि
करणानधिकरणेपदंगर्भबहुव्रीहिः॥प्रथमतः अधिकरणमनधिकरणंयस्येतितद्वि
ग्रहः॥एवंचाधिकरणाभिन्नभेदप्रतियोगितावच्छेदकनिरूपकताकाधेयताविशिष्टः स
मासार्थः अधिकरणपदस्याधेयतानिरूपकार्थत्वात्॥साध्यमधिकरणानधिकर
णंयस्येतिविग्रहार्थःसुगमः॥साध्यनिष्ठाधेयतानिरूपकवृत्तिः समासार्थः॥त

राम
५३

दनंतरत्वप्रत्येनतत्वंनतश्चसाध्याधिकरणानधिकरणत्वस्याभावइति॥नञ्समासे
साध्यानधिकरणानधिकरणत्वस्याभावेनतादृशावृत्तित्वाभावोलभ्यतेएवंतादृशशब्देन
साध्याधिकरणभिन्नावृत्तित्वमपिबोध्यतेसाध्यस्यानधिकरणमितिसमासःसाध्या
धिकरणभिन्नंतदर्थःसाध्यानधिकरणमधिकरणंआधेयतानिरूपकंयस्येतिसमासः॥
साध्यवद्भिन्ननिरूपिताधेयताचानर्थः॥तदुत्तरत्वप्रत्ययेनतादृशाधेयत्वंनतोनञ्स
मासेनतदभाववरनुवादभिप्रायः॥अव्याप्तेःकेवलान्वयिसाध्यकाव्याप्तोमलेहत्वदर्शी
नात्स्वयमितिविशेषः॥मूलोक्तेति॥यत्किंचित्साध्यानधिकरणाधिकरणइतिविशेष
णावत्त्वात्तनानाव्यक्तिकसाध्यकेधूमवद्बाधादर्थः॥उद्देश्यतावच्छेदकसामानाधिकरण्ये
नैवविधेयान्वयः॥यद्वानानाव्यक्तिकसाध्यकनानाव्यक्तिरेवधर्मपरार्थःधर्मस्य

नानात्वान् अवच्छेदकावच्छेदेनैव विधेयान्वयः॥ द्रव्यं गंधादित्याद्यावव्याप्यभावात् साध्ये
नानात्वोपादानं॥ हेतौ नानात्वोपादानप्रयोजनमाह॥ शब्दवान्नेति॥ स्वप्रतियोगिवृत्ति
त्वस्वसामानाधिकरण्योभयसंबंधेन भेदविशिष्टसाध्यतावच्छेदकवत्त्वं साध्यनानात्वं हे
त्वधिकरणयत्किंचिद्वृत्तित्वं हेतुनानात्वं तादृशोभयसंबंधेन भेदविशिष्टहेतुतावच्छे
दकवत्त्वं निवेश्यं॥ शब्दवान् गकारादित्याद्यवारणात् केचित्तु॥ नानाधिकरणकसाध्यके इ
त्येव सम्यक् दीधितावपि व्यक्तिपरम् अधिकरणपरं॥ द्रव्यं पृथिवीत्वादित्यादौ घटादौ घ
टादिनिष्ठनिरूपकत्वाभावसत्त्वादव्याप्तिरेवा॥ शब्दवानित्यत्वाधिकरणे नानात्वनिवेश
फलं॥ पूर्वमनेन वन्हिमान् एतन्महानसत्वादित्यादौ चाव्याप्यकथनान्यूनतेत्याहुः॥ दीधि
तौ नानाव्यक्तिसाध्यकत्वं नानाव्यक्तिकत्वं न यत्किंचित्साध्यानधिकरणवृत्तित्वं॥ ए

तद्वृत्तियावद्धर्मवानेतत्त्वादित्यादावव्याप्त्यभावात्॥ किंतु यत्किंचिद्धेत्वधिकरणावृत्तित्वं॥
तथा च वह्निरपि संयोगी एतत्त्वादित्यादेरपि सङ्ग्रहाच्च न्यूनता किंचित्तु॥ नानाव्यक्तीः स्वरूपाधि
करणे यस्येति व्युत्पत्त्या साध्ये तद्वृत्तित्वं च नानात्वलाभान्न कोपि दोष इत्याहुः॥ जातेः जाति
मत्त्वप्रमाविशेष्यत्वात् सत्तावान् द्रव्यत्वादित्यादौ प्रोक्तप्रकारांतरमालंब्यवेदं॥ नन्वस्तु
एतद्दोषवारणाय साध्यतावच्छेदकावच्छिन्नाधेयताविवेशादस्याशंक्यावच्छेदकतापर्या
प्तिनिवेशेपि तदाधेयताया ऐक्यादतिव्याप्तिर्दुर्वारेति समाधास्यन् द्वितीयलक्षणे तु
त्यरीत्यातिव्याप्तिशंकायसमाधानायमतिरिक्तं पादृष्टांतमाह॥ विशिष्टेति॥ नव्या
स्तु॥ विशिष्टधर्मपर्याप्तिकैवाधेयतावच्छेदकता तद्घटकसामान्यधर्ममात्रे तात्पर्या
स्यानुपगमात्॥ तथा च तादृशावच्छेदकतापर्याप्तिनिवेशो नेयमतिव्याप्तिः॥ सामा

न्यधर्मेच तदीयमवच्छेदकत्वांतरं पर्याप्तमिति वह्निमान् धूमादित्यादौ लक्षणसंगतिरि
त्याहुः॥ यत्रेति॥ स्वप्रतियोगिवृत्तितावच्छेदकत्वस्वसामानाधिकरण्योवच्छेदकत्वोभय
संबंधेन भेदविशिष्टसाध्यतावच्छेदकके स्वावच्छिन्नाधिकरणैकव्यक्तिभिन्नस्वावच्छि
न्नाधिकरणकसाध्यतावच्छेदकत्वेमृति दार्थः॥ तद्भिन्ने चेति निरुक्तनानाधिकरणकसा
ध्यकवृत्तिसंबंधेनतेसप्तम्यधर्मवच्छिन्नत्वस्य साध्यवद्वृत्तित्वान्वये पर्वतावच्छेद्यवह्नि
मद्वृत्तित्वस्य धूमादौ स्वावयवावच्छेदेनाभावसत्वादव्याप्तिराह साध्यवद्वृत्तित्वाभाव
वृत्ति॥ विशिष्टसत्वेति विशिष्टभावादन्यस्यावच्छिन्नाभावस्य सत्तावान् पृथिवीसमवेतत्वम
न्येमिति संदर्भसिद्धत्वात्॥ विशिष्टत्व विशेषित सत्तायाः साध्यत्वे सत्तादिकतादृशो
भाव --- व्यभिचारितनेतद्धर्मावच्छिन्नवत्वप्रवेशः तस्य सार्वभौमेस्त द्वटकसामा

राम

५५

त्यधर्मावच्छिन्नत्वाउपगमात् तेनुविशिष्टस्यातिरिक्तत्वादित्यनेनाविरोधः अनातिरेके
त्वितिपक्षेइदं॥तेनविशिष्टस्यातिरिक्तत्वादित्यनेनाविरोधः अत्रद्रव्यवृत्तित्वविशिष्ट
सत्वेत्यर्थः॥नतुगुणाद्यन्यत्वविशिष्टसत्वेतदतिरिक्ततायाश्चेथकृतैवाभिधानीयत्वा
दित्यपव्याख्यानंतथासतिद्रव्यवृत्तित्वविशिष्टसत्वेऽव्याप्त्यनुद्धारापातात्॥भेदस्त्विति॥
अधेयतयाइवाधिकरणतायाअव्याप्यवृत्तित्वेपिनतद्विदसमानाधिकरणत्वमित्याश
यः॥अधिकरणत्वाभावस्याव्याप्यवृत्तित्वेतद्भेदस्यव्याप्यवृत्तित्वमसंभवित्वंतयोरेक
स्वभावत्वादित्याशयेनाह॥तदव्याप्यवृत्तित्वेत्विति वक्तव्यमिति अत्रप्रतियोगिता
वच्छेदकानांव्याप्यवृत्तित्वात्तदवच्छिन्नभेदस्यव्याप्यवृत्तितयानातिव्याप्तिरितिभावः॥
अत्रवदंति॥वृत्तित्वाभाववत्त्वांतं॥लक्षणनिर्विष्टंनवा॥अघतादृशावृत्तित्वाभा

वाधिकरणत्वविशिष्टतत्ताद्यस्त्रित्वावच्छिन्नमेयकूटोर्थः॥ तथाचनानिव्याप्त्युद्धारसंभवः॥
अव्याप्यवृत्तिधर्मावच्छिन्नप्रतियोगितावच्छेदकतत्केभेदस्याप्यव्याप्यवृत्तित्वात्॥ अन्यथा
समवायिविषयकत्वसंबंधावच्छिन्नप्रतियोगितावच्छेदकत्वानविशिष्टज्ञानभावस्यसमानेय
ततयाअर्थांतरमिति॥ यद्यपिवान्हिमत्तित्वस्यानानुषंगेपिनक्षतिः॥ धर्मिसर्वस्यापिसाध्य
स्याप्रासिसंभवात्॥ तथापितस्याः प्रसिद्धानुमानेपिभावादित्याह॥ वान्हिमानिति॥ लक्ष
णेसंबंधसामान्येनहेत्वधिकरणप्रवेशोपितदंतर्गतकालिकादिसंबंधेनत्वयत्वाधिकर
णाद्यवच्छेद्यवाच्यत्ववन्निरूपितहेतुतावच्छेदकसंबंधावच्छिन्नवृत्तिभावाधिकरणभिन्न
त्वस्यज्ञेयत्वासत्वादित्यर्थः॥ निरवच्छिन्नमिति॥ नचस्वरूपताभानस्यैवस्वरूपतो
वच्छेदकत्वात्पर्वतादिनिष्ठावच्छेदकत्वस्यकथंनिरवच्छिन्नत्वमितिवाच्यं॥ सप्तमीनिर्दे

द्वयमेवेदं कालदेशाभ्यामेवावच्छिन्नं न तु केनाप्यन्येनेति पर्वतादेर्न निरवच्छिन्नावच्छेदक
त्वासिद्धिः॥ यद्यपि हेतुतावच्छेदकसंबंधावच्छिन्नहेत्वधिकरणताविशिष्टस्यावच्छेदक
त्वनिवेशणान्नेयमव्याप्तिः॥ तथापि पर्वतरूपेन वह्निमत्संयुक्तत्वमिति प्रतीतेर्हेत्व
धिकरणतानवच्छिन्नत्वपर्वतस्यावच्छेदकत्वावगाहितयैव निर्वाहे हेत्वधिकरणताविशि
ष्टस्यावच्छेदकत्वे मानाभावः॥ धूमवति पर्वते न वह्निमत्संयुक्तत्वमिति प्रतीतो धूमवत्त्व
स्योपलक्षणत्वेनैवावगाहनसंभवादन्यथा निरवच्छिन्नत्वाभिधानस्योन्मत्तप्रलपि
तत्वापत्तेः॥ एवं नव्योक्तं देशविधया विलक्षणावच्छेदकत्वमपि न स्वीकार्यं मानाभा
वात् गौरवात्॥ केचित्तु॥ निरवच्छिन्नमित्यस्य देशादिविधयाऽवच्छेदकत्वानिरूपकत्व
मर्थमाहुः॥ ननु यदि साध्यवद्वृत्तित्वाभावः॥ तद्ध्यासधिकरणतावच्छिन्नाधिकरणता

निरूपकत्वाभावेस्तदा निरवच्छिन्नत्वं प्रोक्तप्रकारेणाव्याप्तिवारणाय स्यात्॥ ननु साध्योपल
क्षिताधिकरणत्वाभावः॥ तथासति रूपवान्पृथिवीत्वादित्यादौ उत्पत्तिकाले पि हेतौ साध्योप
लक्षिताधिकरणवृत्तित्वसत्वान्नाव्याप्तिः स्यात्॥ तदा च गंधवान्गंधप्रागभावादित्यादौ
गंधप्रागभावाधिकरणे गंधाधिकरणत्वावच्छिन्नाधिकरणतानिरूपिताधेयत्वाभावस
त्वादव्याप्तिः॥ गंधवान्पृथिवीत्वादित्यादौ गंधविशिष्टवृत्तित्वतदभावयोर्निरोधभंगाय
वच्छिन्नावच्छेदकतायाअवश्यकत्वेपि प्रकृते बीजाभावेन तस्यानिरवच्छिन्नत्वात्॥ साध्य
वत्वस्योपलक्षणत्वे च न रूपवान्पृथिवीत्वादित्यादौ नापि गंधवान्गंधप्रागभावादित्या
दौ अव्याप्तिरिति विशेषणतया साध्यवत्वं तत्पृष्ठलग्नं निरवच्छिन्नत्वं चावश्यमेव
त्विति तु॥ अत्र केचित्॥ प्रागभावस्य प्रतियोगितावच्छेदकत्वमते गंधोत्पत्तिकाले गंधप्राग

राम
५७

भावे गंधवद्वृत्तित्वाभावस्याव्याप्यवृत्तितया व्याप्तिरिति निरवच्छिन्नत्वमादरणीयमेवेति ॥ त
नुच्छं ॥ तथापि गंधवान् गंधध्वंसात् घटवान् घटध्वंसात् रूपप्रागभाववान् रूपध्वंसादित्या
दौ कपालाद्यवच्छेदेन हेतौ गंधादिविशिष्टवृत्तित्वाभावसत्वादव्याप्तेः ॥ प्रागुक्तरीत्या
तस्याः निरवच्छिन्नत्वात् ॥ न च साध्यवत्वस्योपलक्षणत्वे उत्पत्तिकालावच्छेदेन वन्हिम
द्वृत्तित्वाभावस्य धूमादौ सत्वाद्वन्हिमान् धूमादित्यादावव्याप्तिरिति वाच्यं ॥ यत्र यत्का
लावच्छेदेनावच्छेद्याश्रयरधिकरणत्वं तत्र तत्कालावच्छेदेन तत्संबंधस्यैव तदवच्छेदकत्व
मिति नियमात् तादृशाभावस्य हेत्वधिकरणानवच्छिन्नत्वात् एवं देशानिकस्यमिति
नियमात् धूमादौ शिखराद्यवच्छेदेन न धूमवद्वृत्तित्वाभावप्रसंगः ॥ एतेनोक्तव्याप्तेरी
दृशरीत्यावारणेपि रूपवान् रसादित्यादौ रसप्रागभावकालविशिष्टावच्छेदेन रूपोप

लक्षितधर्मिवृत्तित्वाभावसत्वादव्याप्तिरतो निरवच्छिन्नत्वमावश्यकमित्यमादेयं॥यत्काला
वच्छेदेनावच्छेद्याधिकरणसंबंधितात्कालावच्छेदेन न साध्यवद्वृत्तित्वस्यैव सत्वात्॥अत्रेष्टं॥
नत्कालकारणभपरिष्कारं वर्णयति॥उपलक्षणस्य प्रतियोगितावच्छेदककोटिप्रविष्टत्वा
नुरोधेनैव विशेषणतयैव साध्यवत्वनिवेशः सार्वभौममतेपि च विशिष्टस्य केवलादन्यत्वेन
केवलादन्यस्य घटध्वंसविशिष्टकपालस्य सत्वेन हेतुमति तत्र घटासत्वेन घटादिसाध्य
कघटध्वंसादव्यभिचारित्वमेव॥एवं च तत्राव्याप्तिवारणायासः॥वायसदर्शनसंदर्शनाभा
ससमानः॥विशिष्टानतिरेकेन लक्षणतयैव तन्निवेशः॥तत्राप्युत्पत्तिकालावच्छिन्न
पर्वते धूमस्य न वह्निमत्संयुक्तमिति प्रतीत्योत्पत्तिकालावच्छिन्ने पर्वतावच्छेदेन धूमेव
ह्निमत्संयुक्तत्वाभावसत्वाभावसत्वादव्याप्तेर्वारणाय निरवच्छिन्नत्वमावश्यकं॥

त्वकपा

त्व

तादृशपर्वतस्यसंयोगेनधूमासंबंधित्वाद्धूमावच्छेदकत्वमितितुनवाच्यं॥धूमोत्पत्तिका
लावच्छिन्नपर्वतसंयोगेनधूमविरहेपिकालिविशेषणतासंबंधेनतत्सत्वात्॥नचोत्पत्तिका
लविशिष्टपर्वतःशुद्धपर्वतादन्यएवसचनहेत्वधिकरणमिति॥अव्याप्तिविरहान्निरवच्छि
न्नत्वव्यर्थमितिवाच्यं॥तादृशकालावच्छिन्नत्वोपलक्षितपर्वतस्यस्वीकर्तव्यत्वात्॥नचोत्पत्ति
कालेधूमस्यनवह्निसत्सयुक्तत्वमितिप्रतीत्याउत्पत्तिकालभावेनिरवच्छिन्नावच्छेदकत्वसं
भवोमानाभावात्॥यद्विवक्ष्यमाणरीत्याकालिकविशेषणतासंबंधःसङ्केतोनावच्छेद
कतानियामकइत्युच्यतेतदारूपवान्पृथिवीत्वादित्यादिअनुधावने॥नचैवविशिष्टान्ति
रिक्तमतेरूपवान्पृथिवीत्वादित्यादेरुत्पत्तिकालविशिष्टघटेति॥रिक्तेव्यभिचारित्वेन
निरवच्छिन्नत्वव्यर्थमितिवाच्यं॥पृथिवीत्वंहिद्विविधं॥एकंविशिष्टसाधारणं॥द्विती

येऽखंडभेदस्वरूपं तद्घावृत्तं न त्वाद्यस्याव्यभिचारित्वेऽपि द्वितीयमव्यभिचारि॥ तत्र द्वितीयसंग्रहा
यनिरवच्छिन्नत्वमावश्यकं॥ अत एवोत्पत्तिकालविशिष्टेत्यनभिधायोत्पत्तिकालावच्छिन्ने
त्यभिधानं संगच्छते धूमविशिष्टवान्वह्निविशिष्टान्यत्वासंभवाद्वह्निमान्धूमादि
त्यादेर्नव्यभिचारित्वशंकेति॥ यत्तु॥ स्वाधिकरणकालावच्छिन्नत्वविशिष्टस्वरूपसंबंधे
न रूपप्रागभावः साध्यः स्वाधिकरणकालावच्छिन्नत्वविशिष्टस्वरूपसंबंधेन रूपध्वं
सो हेतुस्तत्राव्याप्तिः॥ साध्यताहेतुताघटकसंबंधाभ्यां साध्यहेतुमत्वघटितलक्षणासत्वा
दिति तत्तुच्छं नस्यव्यभिचारित्वात्॥ ननु तेनैव संबंधेनेत्यनुक्तौ संबंधासामान्यावच्छि
न्नसाध्यवद्वृत्तित्वस्यैव लाभात्॥ समवेतत्वाभावमादायासंभवाभिधानमयुक्तमत आ
ह॥ हेतुनेति॥ किंत्विति॥ अत्र केचनासंभवस्याविशिष्टतयायत्किंचित्संबंधावच्छि

न्न साध्यवद्वृत्तित्वाभावसंपादनक्लेशः ॥ किमर्थमिति ॥ शंकते ॥ अन्ये तु घटत्वाभावत्वचा
नू तद्व्यक्तित्वादित्यादौ यत्किंचित्संबंधावच्छिन्नवृत्तित्वाभावनिवेशकत्वेन तदनधिकरण
त्वसंभवान्नाव्याप्तिः ॥ संयोगादिसंबंधेन साध्यवद्वृत्तित्वाप्रसिद्धेः ॥ विषयतादेर्वृत्त्यनिया
त्मक न मानत्संबंधावच्छिन्नवृत्तित्वाप्रसिद्धेः ॥ तथा चान्यत्राव्याप्तिव्यंजनाय तत्संपाद
नं सार्थकं ॥ असंभवपदं च स्वमते संबंधत्वरूपवृत्तित्वप्रवेशा भिप्रायेणेति समादध
ति ॥ अप्रसिद्धिपरिहारलाभाय तत्संपादनमित्यन्ये ॥ गगनेति ॥ गगनानधिकरणाप्र
सिद्धेः ॥ जलत्वाद्यधिकरणप्रसिद्धावपि धूमवत्पर्वतस्य तदनधिकरणत्वादिति भा
वः ॥ ननूक्तप्रतीतेर्न विशिष्टावगाहिनी गौरवात् किंतु तुल्यरूपविशेषणद्वयावगा
हिनीत्यत आह ॥ हेतुतावच्छेदकसंबंधेन साध्यवद्वृत्तित्वेति ॥ यस्याधिकरणे यस्य

स्याधिकरणं ॥ येन नातिव्याप्तिः ॥ साध्यवद्वृत्तित्वाभावस्योपलक्षणत्वे विशेषणत्वे च क्र-
मेण दोषद्वयं कृते ॥ न चेति ॥ वस्तुगत्येत्यादेः रूपलक्षितेत्यर्थः ॥ इदं वाच्यं ज्ञेयत्वादित्यादौ हेतौ
साध्यवद्वृत्तित्वाभावासत्त्वात्त्वसंभव इत्यतोऽव्याप्तिरिति ॥ केवलस्येति ॥ यथा गुणो गु-
णान्यत्वविशिष्टसत्तावानित्यादौ अधिकरणतायाः तन्निरूपकतावृत्तियावत्तू ॥ वि-
शेषधर्मावच्छिन्नप्रतियोगितातोऽन्या सामान्यधर्मावच्छिन्नप्रतियोगितासामान्याभाव
ग्रंथलभ्यस्तु स्यात् सिध्यतु गुरुधर्मावच्छिन्नप्रतियोगितानुक्तिः किमर्थमित्याशंक्य तन्मतेतत्सा-
धकमुक्तिमाह ॥ अन्यथेति ॥ सत्तावानिति ननु गुरुधर्मस्य प्रतियोगितावच्छेदकत्वेपि
साध्यवद्वृत्तित्वावच्छिन्नप्रतियोगिताकत्वनिवेशे साध्यवद्वृत्तित्वप्रतियोगिकोभयभावा-
द्विवारणापत्तिः ॥ न च साध्यवद्वृत्तित्वत्वसमनियतप्रतियोगिताभाववः ॥ एवं च गुरुधर्म

राम
६०

स्य प्रतियोगितानवच्छेदकत्वेपि नक्षतिः ॥ उक्तस्थले समवेतत्वाभावस्यैव लक्षणघटक
त्वसंभवादिति चेन्न सार्वभौमानां मते पर्याप्तिसद्भावेन लाघवेन साध्यवद्भिन्नत्वपर्याप्त
प्रतियोगितावच्छेदकताकाभावस्यैव विवक्षितत्वात् ॥ अनुभवं प्रमाणयतीति ॥ द्रव्यत्ववृत्ति
त्वाभावः सत्तावृत्तिः ॥ स्वविशेष्यकसत्तावृत्तित्वप्रकारकप्रत्ययकत्वादित्यनुमाने प्रमाण
माचष्टे इत्यर्थः ॥ शाब्दबोध्यत्वमिति यत्तु शाब्दवाच्यतावच्छेदकधर्मावच्छिन्नत्वं तत् स च
धर्मः सामानाधिकरण्यात्मकवैशिष्ट्यमेवेति तन्न ॥ तद्धतोऽतिरिक्तत्वाभिमानविरोधा
त् ॥ यथाश्रुते शाब्दबोध्यत्वपर्यन्ता विवक्षणे ॥ उक्तग्रंथेनेति तद्ग्रंथेनाविशिष्टस्याति
रिक्तत्वलाभेपि तादृशासत्ताव्यक्तेः स्वतद्लाभात् ॥ यथोक्तार्थे तु हेतोर्विशिष्टसत्त्वशा
ब्दबोध्यतयैव विशिष्टशाब्दबोध्यत्वात्तासंगतिः ॥ विशेष्येति ॥ स्वरूपेणेति शेषः

विशिष्टत्वेन न भेदः विशिष्टस्य भेदस्वीकारे स्वास्मिन् स्वभेदापत्तेः॥ अविशिष्टे च भेदामा
पत्तेः॥ अत्र वदंति॥ एवं सति शुद्धसत्वे साध्यवद्वृत्तित्वाभावविशिष्टसत्ताभेदसत्वाद्वृ
त्त्यंसत्वादावतिव्याप्तिः शुद्धधर्मे च विशिष्टधर्मभेदसत्वाद्धेत्वधिकरणावछिन्नत्ववैय
र्थ्यं च स्यादिति॥ अत्राहुः॥ हेत्वधिकरणावछिन्नत्वोपलक्षितसाध्याभाववद्वृत्तित्वा
भावात् भेदनिवेशान्न दोष इति॥ एकेति॥ वैशिष्ट्यानुपस्थितिकाले हेत्वभानं नेत्यभि
मानः॥ दूरं द्रष्टाभिधानं च सिद्धांतलक्षणे दीधितिकारो निराकरिष्यति॥ हेतुतावछेद
कावछिन्नत्वविवक्षाया अशक्यत्वबीजमात्राकते॥ न चेति॥ स्वं धर्मः॥ सर्वस्यापि धू
मस्य तत्तद्धूमावछिन्नसाध्यवदवृत्तित्वात् तद्भेदन्यत्वं विहाय तद्भेदवृत्तित्वनुक्तं॥ वि
शिष्टसत्ताहेतुके च विशिष्टसत्तात्वावछिन्नाधिकरणावछेद्यसंबंधांतरावछिन्नवृत्ति

राम
६१

कनिष्ठसाध्यवद्वृत्तित्ववह्नित्वविशिष्टसत्तात्वमादायैवलक्षणसमन्वयः ॥ अथ वह्निधूमत्वादेर्व्याप्य
तावच्छेदकत्वं न स्यात् व्याप्यानतिरिक्तवृत्तित्वे सति व्याप्तिघटकत्वस्यैव तथात्वात् इत्यत्र दोषापत्तिमाह ॥
धूमत्वस्येति ॥ व्याप्तिसमानाधिकरण्यमात्रेण तदवच्छेदकत्वे प्राप्तसक्षिकादिपरामर्शाद्दोषस्वसामग्री
वन्नातथाभावस्यातिप्रसक्तस्यापित्ववारणाय व्याप्यनतिरिक्तवृत्तित्वमात्रं तथा न तु व्याप्तिघ
टकत्वमपिव्यर्थत्वात् वस्तुतः तदुपादानेपिनक्षतिः तत्तद्धूमस्यैव हेतुतावच्छेदकत्वोपगमादिति
भावः ॥ अत एव स्वार्थे तथोपगमसंभवेपिपरार्थे तदसंभवं कथायामित्यनेन प्रदर्शयिष्यति ॥ गौ
रवमिति ॥ स्वाधिकरणप्रवेशे लाघवात् ॥ न च प्राक्तरीत्या व्याप्त्यभिधानमेवोचितं न तु गौरव
मिति वाच्यं ॥ स्वविशिष्टाधिकरणावच्छेद्यहेतुतावच्छेदकावच्छिन्नाधिकरणताकाभावनिष्ठ
साध्यवद्वृत्तित्वत्वावच्छिन्नप्रतियोगिताकत्ववदन्यत्वकधर्मवत्वं तदव्याप्तिवारणाय परि

परणीयमभिप्रेत्यागौरवाभिधानात्॥ यद्वाहेतुतावच्छेदकावच्छिन्नेत्यस्य स्वावच्छिन्नेत्यर्थः॥ हेतु
तावच्छेदकपदं चनानानाव्यक्तिकहेतौ प्रदर्शितं तत्र कृक्तित्वस्यैव हेतुतावच्छेदकत्वमादायाऽसंभवः
सामान्यरूपेण हेतुमात्रे हेतुभेदेन व्याप्तेर्भेदादिति भावः॥ यद्यपि सामान्यधर्मे विशिष्टाधिकर
णत्वात्रासिद्धावपि सामान्यधर्मावच्छिन्नाधिकरणत्वमग्रे ग्रंथ एवाभिधानीयं॥ तथापि तावता
प्युक्तासंभवएवेत्यत्र तात्पर्यं॥ ननु सामान्यरूपेणालक्ष्यतायाऽभासितत्वात्तेन रूपेण हेताव
संभवेद्दूषणापत्तिः॥ सामान्यरूपेण लक्ष्यतां व्यवस्थापयति॥ एवमिति॥ वस्तुतस्तु विशिष्ट
नतिरिक्ततामतानुरोधेन विशिष्टसत्तायाव्याप्यत्वनिर्वाहाय स्वावच्छिन्नाधिकरणतागर्भे
लक्षणं संभवतीत्याह॥ असंभवइति॥ विशिष्टहेतुमात्रेत्यादिः॥ विशिष्टेति॥ विशिष्टास्य
नतिरिक्तत्वे वैशिष्ट्यातिरिक्तत्वे वा तदव्याप्यत्वोपगमेन सार्वभौमानां विशिष्टाधिकरणता

राम
६२

नुपगमस्सिद्धेरितिभावः ॥ नन्वेवं येन रूपेण साध्यत्वं तद्रूपावच्छिन्नवत्वमिति पूर्वग्रंथविरोधः ॥
विशिष्टसाध्याधिकरणत्वप्रसिद्धेः ॥ यदि विशिष्टसाध्येन रूपेणाधिकरणनिवेशाद्दत्युच्यते
तदा विशिष्टहेतुनारूपेणाधिकरणं निवेश्यलक्षणपरिष्कारः स्यात् ॥ विलक्षविशिष्टाधि
करणतायाअप्रामाणिकतया संसर्गतायाऽअधिकरणतामात्रनिवेश्येच विशिष्टहेतुनारूपेण
निवेश्येपि न दोषोद्धार इति यदि तदा तां संसर्गविधया निवेश्य विशिष्टसाध्येन रूपेणाधिक
रणं निवेश्य दोषोद्धारो दुष्करः ॥ मैवं ॥ विशिष्टसाध्यके विशिष्टातिरिक्तज्ञामते विशिष्टपर
बोध्यं तमेव निवेश्य दोषोद्धारः ॥ अन्यत्र तु तद्रूपावच्छिन्नसाध्यवत्वमेवेति तद्ग्रंथसंगतेः ॥
एवं चाधिकरणतानां अधिकरणात्मकतयाऽनतिप्रसक्ताधिकरणतासंसर्गता न निवेश्या
इति विशिष्टहेतुनाधिकरणनिवेशः सुकर इति सामान्यधर्मावच्छिन्नस्यालक्ष्यत्वमप्युप

१३५

न्त मित्याशयेनाह ॥ एवमिति ॥ यद्रूपावच्छिन्नस्य साध्यव्याप्यत्वमुदाहरणेनोपदर्शनीयं तद्रू
पावच्छिन्नस्यैव हेतुतयोपन्यासनियमात् ॥ ननु सिद्धान्ते धूमत्वस्य व्याप्यघटकत्वात्कथमस्यो
कथमुपन्यास इति चेन्न ॥ हेतुवृत्तिधर्माघटितव्याप्तिनये व्याप्तिघटितत्वेनाघटितव्या
प्यनतिरिक्तवृत्तित्वमेव व्याप्यतावच्छेदकत्वं तद्घटितव्याप्तिनये तु तद्घटितमित्यभिप्रायात् ॥ गु
णइति ॥ न चैतादृशप्रतीतिसिद्धा सिद्धिव्याघातः विशिष्टसत्ताशुद्धसत्ताभिन्ना गुणविशे
ष्यकप्रमाप्रकारभिन्नत्वात् ॥ गुणविशेष्यतानिरूपितप्रमात्वघटप्रकारतावदन्यत्वादितिया
वत् ॥ तेन गुणः सत्तावान्द्रव्यविशिष्टसत्तावांश्चेति ज्ञानमादाय न स्वरूपासिद्धिः ॥ अत्र प्र
तीत्यभावप्रदर्शनं विशिष्टस्य शुद्धसत्तानन्यत्वे गुणविशेष्यकविशिष्टसत्ताप्रकारकप्र
यापत्तिस्त्सत्वकं ॥ यद्यदनन्यं तत्तदधिकरणविशेष्यकस्वप्रकारकप्रत्ययकमितिसामान्य

राम
६३

तोऽप्यास्याः प्रसिद्ध्यायतोऽपाद्यतावच्छेदकाभाववविशिष्टायाद्यनिर्णयस्यापाद्याभावनिर्णय
समशीलतयाः गत्वात्॥ प्रकृते च तथाविधस्य गुणविशेष्यकप्रत्ययो विशिष्टसत्ताप्रकारक
त्यादिः प्रतीत्यभाववत्त्वेन कथं सिद्ध्येदिति दिक्॥ प्रतीतिविरहमन्यथोपादयन्॥ स्वरूप
सिद्धिमाह॥ गुणस्येति॥ अस्त्विति॥ विशिष्टसत्ताप्रत्ययस्यातिरिक्तविशिष्टसाधकत्वस
भवादतिरिक्तविशिष्टाधिकरणत्वानुगमादितिभावः॥ क्वप्ताधिकरणत्वेति॥ द्रव्यत्वाद्यधि
करणत्वं सत्ताधिकरणतातो द्रव्यादेश्च भिन्नभावत्रयकं च तदात्मकमेव विशिष्टाधिकरणता
याइत्यर्थः॥ भावप्रत्ययशून्यो बहुपुस्तकपाठः मुपगमः॥ नन्वेवमधिकरणानां नानात्वाद
धिकरणताया नानात्वं स्यात्ततस्तदननुगमकमतिरिक्तमधिकरणत्वमुपेयं स्यात्तद्वरं विशि
ष्टमेवातिरिक्तं यद्वा यादि केवलविशिष्टयोरैक्यं तदधिकरणताभेदं विना विशिष्टाधिकरण

ताया गुणानात्मकत्वं न स्यात् तुल्यन्यायेन केवलाधिकरणताया गुणरूपत्वादित्यत आह ॥ किंचेति ॥ तदसत्वादिति ॥ भवन्मते विशिष्टसत्तायाः सामान्यघटितविशेषत्वासंभवादिति भावः ॥ अनुभवानुरोधेन तद्विरोधित्वस्वीकारेप्याह ॥ एवमिति ॥ विशेषणेति ॥ तद्विगमश्च विशेषणज्ञानादिविगमाद्बोध्यः ॥ तद्विगमो न कार्याभावप्रयोजकः प्रकारणविरहत्वादिति भावः ॥ दीधितौ चैवकारेण विशिष्टसत्ताव्यवच्छेदः ॥ ननु विशिष्टाधिकरणतासंबंधेन तस्यापि व्याप्यत्वात् कथं तद्व्यवच्छेदः ॥ मैवं ॥ विशिष्टाधिकरणताया अभासेनिराकृतत्वेन तस्याः संबंधत्वाप्रसक्तेः ॥ शुद्धाधिकरणतायाश्च व्याप्यत्वानिर्वाहकत्वात् ॥ उपलक्षितहेतुमत्तासाधारणरूपेण निवेशासंभवादाह ॥ तथा चेति ॥ नाव्याप्तिरिति ॥ एवं वन्हिमान्धूमादित्यादावसद्धेतौ कालिकसंबंधावछिन्नतदधिकरणतायास्तन्नि

ए धर्मावच्छेदकतायां नियामकत्वान्नैगिकत्वान्न पूर्वोपदर्शितातिव्याप्तिः॥ अत एव द्रव्यत्वे गुणे
इत्यादौ गुणस्य न द्रव्यत्वाधिकरणतयेत्यग्रिमोक्तिः॥ संगच्छते॥ धूमाद्यंतरसंयुक्तत्वावच्छि
वस्तु अलीकमेवेति भावः॥ अतिरिक्त विशिष्टाधिकरणतामते तद्बुद्धौ विशेषणवत्तानिश्चयः कारणं॥
साध्यसामानाधिकरण्यविशिष्टपक्षधर्मत्वं तु पक्षे साध्यवत्ताग्रहं विना दुर्ग्रहमिति पंक्तेः॥ विशेष
णाभाववत्तानिश्चयश्च तद्विरोध्येव न त्वाहत्याविशिष्टवत्ताबुद्धिविरोधी तत्र विशेष्यांशे वि
शेषणभानेन भिन्नधर्मिकत्वात्॥ एवं तादृशप्रतीतीनां नाधिकरणताद्वयावगाहित्वं विशिष्ट
वद्विषयाकारताविलोपापत्तेः॥ अत एव बाधग्रंथदीधितिकारोपि बाधेषु पक्षस्य विशेष्याभाव
वत्वमेव गणयामास न तु तस्य विशेषणाभाववत्वमित्यस्वरसात्प्रदीति॥ प्रत्येकविशेषणस्य
विशेष्यस्य च तथा च विभिन्नाधिकरणताद्वयस्य प्रत्येकाधेयताद्वयनिरूपितत्वेत्यर्थः॥

ननु विशिष्टवत्ताबुद्धेर्विशेषणाभाववत्त्वनिर्णयस्य प्रतिबंधकत्वमनुभवबलाद् उपेयमित्यत आह॥ विशि
ष्टेति॥ विशेषणाभाववत्ताज्ञानस्य गुणो गुणान्यत्वाभाववनित्यादिज्ञानं यद्वोच्यते इत्यन्वयः॥ तथा
चाव्याप्तिर्दुर्वारैवेति भावः॥ अनतिरिक्तेति विशिष्टाधिकरणत्वार्थकं विशिष्टस्येत्यनुव
र्तने॥ प्रत्येकाधिकरणतासमुदायादिति शेषः॥ न च द्वन्द्वाधिकरणतासमुदायसंबंधेन विशे
षणविशेष्यानतिरिक्तविशिष्टसत्ताख्या आप्यत्वसंभवाद्धीधितावेवकारवैयर्थ्यमिति वाच्यं॥
अधिकरणतायाः न संबंधतासमवायसंयोगादेः संबंधताविलोपापत्तेरित्याशयात्॥ लक्षण
स्य हेतुतावच्छेदकगर्भत्वं प्रकर्षः विशिष्टपदस्य यथाश्रुतार्थत्यागोऽस्वरसः॥ साक्षात्संबंधेन
स्वरूपसंबंधेन अवच्छेदकत्वाख्येति निरूपकत्वाख्येत्यर्थः॥ घटत्वमिति न तादात्म्यकत्वा
भावस्य तादात्म्यसंबंधेन तदभावरूपत्वात्॥ तादात्म्यसंबंधस्याभिन्नप्रतिप्रतियोग्यनुयोगि

राम
६५

कत्वात्॥ इष्टापत्तौ चान्योन्याभावप्रतियोगितानवच्छेदकरूपत्वकेवलान्वयिभंगापत्तेरिति॥ अत्र स्व
निरूपितहेतुतावच्छेदकसंबंधेनेत्युक्तौ एतद्दोषवारणापि इदमित्याद्यग्रिमदोषासंगतिरतः स्वा
धिकरणनिरूपितेत्युक्तं॥ नन्वेतादृशाभिप्रायवर्णनमयुक्तं स्वाधिकरणीयत्वस्य लब्धुमशक्यत्वा
त्॥ कथंचित्तल्लाभोपगमे तु सकलदोषवारस्य स्वनिरूपितत्वघटितस्य लब्धमूलादित्याशंक्य
तत्रेति॥ तच्छब्दपरामृष्टे केवलान्वयित्वं साध्यनिष्ठं साध्यपदासत्वात्॥ किंतु हेतुनिष्ठमेव॥ साध्यस्य
व्यभिरकेत्वे केवलान्वयिहेतुर्व्यभिचार्येवेति साध्यनिष्ठं तद्दार्थिकमित्यभिप्रेत्याह॥ वस्तुत
स्त्विति॥ अत्र्यंनपदं च केवलान्वयिताघटकसंबंधावच्छिन्नप्रतियोगितालाभाय अन्यथाव्य
धिकरणसंबंधावच्छिन्नवाच्यत्वाद्यभावमादायासंभवापत्तेः॥ एतेनोक्तदोषवारणाय केव
लान्वयिताघटकसंबंधावच्छिन्नत्वप्रतियोगितात्वमत्यंताभावविशेषणं॥ तथा च तथा चेति

ग्रंथासंगतिः॥ तादात्म्यसंबंधावच्छिन्नात्यंताभावाप्रसिद्धेः॥ नचतत्राप्रसिद्ध्यैवप्रमेयस्यन
केवलान्वयित्वमित्याशयोस्त्विति वाच्यं॥ तत्स्त्विति ग्रंथासंगतेः॥ अवच्छेदकगर्भत्वेपितस्यकेव
लान्वयित्वनिराकरणसंभवादित्यपास्तं प्रतियोगित्वं वैशिष्ट्याद्यनवच्छिन्नेयात्र॥ एवं संयोगा
भावसंग्रहाहलं प्रतियोगिवैयधिकरण्यप्रकृतकेवलान्वयित्वेनदेयं॥ प्रयोजनाभावात्॥ यदि
तुकेवलान्वयिन्यभावादित्यत्रैतत्केवलान्वयित्वमुच्यते॥ तदाप्रमेयादिरूपकेवलान्वयिसा
ध्यकेप्रमेयव्याप्यकथनान्न्यूनतास्यादिति तत्रकेवलान्वयिसाध्यके निरुद्वृत्तिनिरूपेयानतु
अत्रमुख्यकेवलान्वयित्वस्यसर्वनाम्नातच्छब्देनपरामर्शसंभवादितिअभिप्रायः॥ तादृशेति॥
नचवाच्यंप्रमेयादित्यादौद्वितीयलक्षणाव्याप्तेः॥ सत्वादकथनेनन्यूनतासार्वभौममने
साध्यवद्भिन्ननिरूपितहेतुतावच्छेदकसंबंधावच्छिन्नवृत्तित्वानधिकरणत्वंद्वितीयलक्षणार्थः॥

राम
६६

अधिकरणतावृत्त्यापूर्वस्माद्विशेषः समवायसत्तावान्द्रव्यत्वादित्यादावव्याप्त्युक्तेः कथनेनन्यूनतावच्छेदकत्वन्यू
नतायाअपीष्टत्वादित्याशयः॥ आहुरित्यस्वरससूचनाय॥ केवलान्वयिसाध्यकत्वसामानाधि
करण्येनाद्यलक्षणाव्याप्त्यन्वयोद्धृत्तीयलक्षणाभिप्रायेणेत्यस्यासंगतिः॥ ऋजुतया
प्रथमलक्षणे सामानाधिकरण्यनेत्येतावन्मात्रापेक्षणादिति॥ नव्यास्तु॥ वृत्तिनियामक
संबंधावच्छिन्नहेतुताकानां नैतल्लक्षणलक्ष्यता॥ तथाच॥ तादात्म्यसंबंधेन हेतोः कथम
व्याप्तिरित्याहुः॥ गुणेति॥ नित्यगुणागुणत्वमभावः॥ सत्त्वाभावादिकं वाग्राह्यं तेनका
लिकसंबंधेसामानाधिकरण्यादिना गुणादेर्द्रव्यत्वसंबंधित्वेपि नासंगतिरितिवदंति॥
तदवच्छेदकत्वस्येति॥ अवच्छेदकत्वं निरूपकत्वादन्यत्स्वरूपसंबंधविशेषः प्रतियोगि
त्वाद्याश्रयः निरूपकतारव्येति॥ सामानाधिकरण्याभावविषयत्वानुभववशादस्तु तद्विषयः

ज॰ टी॰

कथंचिद्वृत्यनियामकनिरूपकतासंबंधावच्छिन्नतद्भावनत्वाश्रयतासंबंधावच्छिन्नतद्भा
वः सामानाधिकरण्यनिरूपकत्वाभावस्तु उचितइतिभावः॥ तथा च सत्तायामिति॥ प्रतीति
बाधितत्वादितिदीधितेस्तादृशप्रतीतिरूपाद्याभावस्यव्यापकभाववत्ताज्ञानमुद्रयासत्
तायां द्रव्यत्वाभावप्रतीतिबाधकत्वादित्यर्थः॥ नचद्रव्यवृत्तित्वाभाववद्वृत्तित्वप्रमाविरुद्धार्थाव
गाहित्वरूपलिंगेनसत्तायांद्रव्यवृत्तित्वाभावप्रत्ययस्यभ्रमत्वंनसाधयितुंशक्यंसमूहालंबना
त्मकतत्प्रत्ययस्ययस्यकस्यचिदंशेभ्रमत्वसत्वेनार्थांतरसंभवादितिवाच्यं॥ सत्ताविशेष्यता
निरूपितद्रव्यवृत्तित्वभावप्रकारकताभ्रमत्वरूपासत्तानिष्ठभेदप्रतियोगितावच्छेदकीभ
तद्रव्यवृत्तित्वाभावप्रकारकत्वादितिप्रयोगः साधनाप्रसिद्धिशंकावारणार्थंबाधकप्रती
तिप्रदर्शने॥ तद्भेददीपीति॥ साध्यासामानाधिकरण्यभाववानू यो यः॥ तद्भिन्नत्वकूट

राम
६७

वत्वं निरवच्छिन्नविशेषणतासंबंधेन साध्यसामानाधिकरण्याभाववद्वृत्तित्वं वा लक्षणार्थः ।
नन्वेवं सामानाधिकरण्याद्यव्याप्यवृत्तित्वे
तथा च नातिव्याप्तिरिति भावः द्रव्यवृत्तित्वाभाववद्वृत्तीति ॥ ननु सामानाधिकरण्याद्यव्याप्यवृत्तित्वे
तथा च नातिव्याप्तिरिति भावः ॥ सत्ताया वृत्तित्वे गुणस्ये
द्रव्यवृत्तित्वाभावो न सत्तावृत्तिरिति प्रत्ययस्य कथं बाधकत्वं अत एव नव्याः ॥ सत्वावृत्तित्वे गुणस्ये
वावच्छेदकत्वाद्भावावच्छेदकं गुणत्वभावस्य भेदस्याव्याप्यवृत्तितया तद्वगाहितयोक्तप्रतीते
र्बोधकत्वं मेनिरे ॥ तर्कालंकाराः पुनः भेदस्याव्याप्यवृत्तित्वमाभासयामासुरिति भेदावगाहि
त्वेपि नोपपत्तिरिति चेत् ॥ द्रव्यवृत्तित्वाभाववद्वृत्तेरस्यैवाव्याप्यवृत्तित्वं न तु सत्तात्ववद्वृत्तेरस्ये
त्यभिप्रायेण दीधितिसंगमप्यैकदेशस्य त्यादिनाऽभिधानीयतयाऽदोषात् ॥ अत्र न स
त्ताया वृत्तिरित्यनेनाभासिताव्याप्यवृत्तित्वं दूष्यते ॥ सत्ताश्रयस्य द्रव्यवृत्तित्वाभाववद्वृ
त्त्यर्थकत्वात् ॥ यदि अवच्छेदकं सत्त्यस्य सत्तावृत्तित्वावच्छिन्नभेदस्याव्याप्यव्याप्यवृत्ति

त्वं मन्यते ॥ तदा सत्तावृत्तिभेदः द्रव्यवृत्तित्वाभावावृत्तिरिति प्रत्ययान्तरं बाधकमन्वेष्टव्यं ॥ त
थाचाव्याप्यवृत्तित्वदूषकप्रत्ययधाराविषयाणामव्याप्यवृत्तित्वोपगममपेक्ष्याधेयत्वस्य
व्याप्यवृत्तित्वोपगमः सम्यक् अत एवावयिमाभासप्रतीतेरसिद्ध्यभिधानं आधेयत्वस्यमा
प्यवृत्तित्वासिद्ध्यर्थमिति चतुराः ॥ केचित्तु ॥ अतीन्द्रियसाध्यको अतीन्द्रियव्यभिचारिणि चे
त्यर्थः ॥ तेनाभयत्रनातीन्द्रियत्ववैयर्थ्यं ॥ इदं गुरुरूपादित्यादौ क्षितिपाथोन्यतरवृत्ति
त्वाभावोध्यक्षः ॥ तत्समनियततया गुरुत्ववृत्तित्वाभावानुमानसंभवादतीन्द्रियव्यभिचा
र्यनुधावनमित्याहुः ॥ तन्न ॥ वायुत्वादौ रूपवद्वृत्तित्वस्य संभवेपि त्राचावृत्तित्वस्य चाध्य
क्षस्याप्रामाणिकत्वात् तद्रूपादौ गुर्ववृत्तित्वस्य जलत्वगगनाभावादित्यादौ हेतौ जलवृत्ति
त्वाभावस्याप्यध्यक्षसंभवादुभयातीन्द्रियत्वस्यावश्यकत्वादित्यभिप्रायवान् आह मन

राम
९९

स्त्वदिति॥ नन्वपरमाण्यवच्छेद्यमनोवृत्तित्वाभावस्याप्रत्यक्षतया तदधिकरणभिन्नत्वासि
द्धेरेवनातिव्याप्तिरितिवाच्यं॥ साध्यवद्वृत्तित्वाभावविशिष्टस्य यत्साधिकरणमिति निष्कृष्ट
स्यातिव्याप्तेः॥ घटादौ पटभेदस्य प्रत्यक्षतया मनोवृत्तित्वाभावविशिष्टस्य सत्त्य परमाण्वा
दावपि सत्वात्॥ वस्तुतस्तु प्रतियोग्यप्रत्यक्षेपि अभावस्याप्रत्यक्षत्वादिति ध्येयं तद्व्यक्ति
त्वावच्छिन्नाभेदः॥ अनुत्वमेदादिः॥ निरवच्छिन्नविशेषणतासंबंधावच्छिन्नसाध्यवद्वृत्ति
भेदाधिकरणतामप्याहुः॥ व्याप्यंतरस्यापि सिद्धांतादिसिद्धांतव्याप्तेरपि॥ मतु साध्याभाव
वदवृत्तित्वस्य व्यभिचारस्यैव हेतुत्वादिति॥ ननु हेत्वधिकरणत्वं हेतुसंबंधित्वं अन्यथा ता
दात्म्यसंबंधेन हेतावव्याप्तेः॥ तथा चावच्छेदकतासंबंधेन गोत्वसंबंधितायास्तत्क्षणे
सत्वान्नाव्याप्तिरित्यत आह॥ मत्विति॥ मतेत्विति॥ अधिकरणतानिवेशोत्तादात्म्येन हेतौ

वव्याप्तिः॥ संबंधितानि वेत्यो यस्वसमानकालीनेतस्याः कथमसत्वमित्यरुचिसूचनाय॥ वि
शेषरूपेण संसर्गत्वाभावे प्याह॥ साध्येति॥ हेतुवृत्तिकेति॥ हेतुतावच्छेदकावच्छिन्नवृत्तिके
त्यर्थः॥ तेन कालिकसंबंधेन महानसीयधूमाद्यधिकरणपर्वतावच्छेदेन तत्तद्धूमादौ वह्नि
मद्वृत्तित्वाभावसत्वेपि नाव्याप्तिः॥ धूमत्वाद्यवच्छिन्नाधिकरणताको वह्निसामानाधिक
रण्याभावो न धूमादौ पर्वतीयधूमे न समानाधिकरण्यमित्यननुभवात् अपितु तत्तद्धू
मत्वावच्छिन्नाधिकरणताक एव॥ अव्यभिचारिणि तु सत्तायां गुणे न द्रव्यत्वसामानाधिक
रण्यमित्यनुभवान्नातिव्याप्तिः॥ यद्वा कालिकसंबंधस्यावच्छेदकत्वानियामकत्वमुक्तप्रा
क्॥ गदाधरभट्टाचार्यस्तु॥ हेतुतावच्छेदकसंबंधावच्छिन्नसाध्यसामानाधिकरण्य
त्वेमित्यभिहितं॥ तत्र हेतुतावच्छेदकसंबंधावच्छिन्नत्वं व्यर्थमिति द्रष्टव्यं॥ गमनेखा

राम
६९

वयवे धूमेव॥ वह्निसामानाधिकरण्याभावसत्वाद्व्याप्तेर्वारणाय हेतुरन्तिकान्तं॥ साध्यव
द्वृत्तित्वाभावस्यैक्येन स एव दोषद्वृत्ति हेतुवृत्तित्वेऽवच्छेदकत्वान्तनिवेशः॥ स्वयंपूर्वकल्पे स्व
रूपं प्रकाशयति॥ इत्थं चेति॥ गुरुचरणा इत्यस्वरससूचनाय स च द्वितीयगुरुधर्मावच्छि
न्नावच्छिन्नसाध्यकव्यभिचारिण्यतिव्याप्तिः॥ किंच विशिष्टस्यातिरिक्तत्वेऽनतिरिक्तत्वे
च यदुभयं विच्छिन्नाधिकरणत्वविवक्षा वैयर्थ्यं॥ विशिष्टाधिकरणताया अतिरिक्तत्वं तु
दीधितिकारेणानाद्रीतं॥ किंच॥ धूमान्तरसंयुक्तधूमावयवेपि प्रामाणिकं इति अव्या
प्तिः॥ स्वाधिकरण्यावच्छिन्नस्ववृत्तित्वनिवेशे च व्याप्तिभेद इति॥ स्वभिन्नेति॥ संबंधा
न्तरेण वर्तमानेति तु सत्ताद्येकव्यक्तिकपरं॥ अत्र धूमवान्वह्नेरित्यादावतिव्याप्तिः॥
हेतुवच्छेदकीभवच्छेदेन तद्भावाधिकरणभिन्नत्वोक्तौ वह्निमान्धूमादित्यादौ वाच्यं प्रमे

याद्रिस्यादौ स्वाव्याप्तिः॥ अस्वरसः॥ तत्वमिति व्याप्तिः ननूक्तोभयाभावः प्रयोजनाभावादिति
दोषः॥ नचैवं धूममवत्कपालसमवेतेमहानससंयुक्तघटेतादृशाभावाधिकरणतायां हेत्वा
धिकरणावच्छिन्नत्वादव्याप्तिः॥ एतन्निष्कर्षस्य एतद्रूपवान् एतद्रसादित्यादिस्थल
परवातु॥ इत्यादिकमित्यादिना साध्यवद्वृत्तित्वाभावाधिकरणतासामान्ययदधिकरणा
वच्छेद्यहेतुवृत्तित्वाभावः एतत्वं स्वनिष्ठसाध्यसामानाधिकरण्याभावानवच्छेदकहेत्व
धिकरणसामान्यकत्वं [illegible]वेत्यस्य परिग्रहः॥ वाच्यत्वादीति॥ स्वाधिकरणनिरूपित
हेतुतावच्छेदकसंबंधेन साध्यवद्वृत्तित्वप्रवेशो च न दोषदूति ध्येयं॥ आत्मसमवेतत्वमा
त्मसमवायः॥ आत्मद्रव्यत्वेन कालवृत्तित्वमिति प्रतीत्या तत्रावच्छेदकत्वं॥ छ॥ जाग
दीश्याः टिप्पणी अनुमानमंजूषापंचलक्षणी समाप्ताः॥ ॥ विषयताः यावविषयि

रूपत्वेऽतिप्रसक्तिरेव दोषः विषयरूपत्वेव घटादीनां समवायित्वमुवेत्यत आह ॥ पदार्थो

तरमिति ॥ मीमांसकादिमतसिद्धमित्यादिः ॥ अतिप्रसक्तत्वात् ॥ तीरादेर्गंगादिपदवाच्य

त्वप्रसंगात् ॥ वाच्यत्वस्येच्छाविषयत्वरूपत्वपक्षेच नायंदोषः गंगायां वर्तमानस्येतीरादा

वभावात् ॥ विषयभेदेन विषयताभेदात् ॥ न चैष पक्षेपि गंगापदबोध्यत्वप्रकारकत्ववि

शिष्टेच्छावत्वस्य तीरेऽसत्वान्नातिप्रसंगइतिवाच्यं ॥ तावतापि गंगापदवाच्यत्वं तीरस्येती

तिप्रतीत्यापत्तेः ॥ तत्रविशिष्टाधिकरणत्वासत्वेपि विशिष्टनिरूपितवृत्तित्वस्य तत्रानं

पायात् ॥ किंच विशिष्टेच्छाया वाच्यत्वरूपत्व गौरवं गंगानिष्टतादृशात्वावच्छिन्नप्रकारके

त्वोपलक्षितेच्छाविषयत्वस्यैव गंगापदवाच्यत्वे तेतरमिष्टस्येयत्त्वैव लाघवात् समवाय

कारणत्वं समवायसंबंधावच्छिन्नकार्यतानिरूपितता दात्म्यसंबंधावच्छिन्नकारणता ॥

१४१

विषयवि षयाकारणत्व वारणाय समवाय निवेशः॥ निमित्त विधयाकारणत्ववारणाय तदा
त्म्यनिवेशः॥ उद्देश्यत्वमस्वरः प्रमेयवानिति॥ यद्यप्ययेस्याशंकयाः यत्समानाधिकरणा
त्यंतिलक्षणाभिप्रायकतायाः उच्यमानतयातत्रापि समवायितयावाच्यत्वाभावएवप्रसिद्ध्य
तीतिनन्ननत्ता॥ तथा चैतल्लक्षणघटकाभाव परतया व्याकारो व्याकारएव द्वितीयलक्षणे
घटकाभावस्तु वक्ष्यते॥ अदर्शनीयाभावानां तद्घटकत्वासंभवाच्च॥ नापि कूटघटितलक्ष
णाभिप्रायकतयातस्यवक्ष्यमाणतयातदुत्तरमेवैतपंक्तेरुचितत्वात्॥ तथापि खंडनावता
रकलक्षणानमिवाथेत्यादिग्रंथाभिप्रेतत्वात् स्वलक्षणस्यैवानुक्तेपि कूटघटितस्यतल्ल
क्षणवादिनातच्छाकाभिप्रेतत्वेतत्रतेप्रमेयसाध्यकाव्याप्तिग्रस्तत्वशंकयातन्नघटते
तोत्रेवत्यस्पष्टत्वेदरिति॥ नचेवंमोमानाव्याप्तिश्लिष्टव्याप्तिहीनतायाकूटघटितस्यो

क्ताभिप्रतत्वमिव खंडनावतारकत्वमपिस्यादिति वाच्यं॥ तस्याथेत्यादिग्रंथोक्ताभिप्रेतत्वंभव
तु अतिव्याप्त्या अशुद्धस्यापितस्याग्रंथोक्तभिप्रेतत्वे बाधकाभावात्॥ खंडनावतारकत्वंतुत
स्यनसंभवति॥ अशुद्धत्वादतिव्याप्त्यनवतारकत्वाध्याभावः इतिह्यग्रेस्वयंतद्दूषयिष्यते॥
के

[OrderDescription]
,CREATED=25.09.20 15:35
,TRANSFERRED=2020/09/25 at 15:52:16
,PAGES=143
,TYPE=STD
,NAME=S0003732
,Book Name=M-1667-JAGDISHI TIKA
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF
,FILE19=00000019.TIF

FILE20=00000020.TIF
,FILE21=00000021.TIF
,FILE22=00000022.TIF
,FILE23=00000023.TIF
,FILE24=00000024.TIF
,FILE25=00000025.TIF
,FILE26=00000026.TIF
,FILE27=00000027.TIF
,FILE28=00000028.TIF
,FILE29=00000029.TIF
,FILE30=00000030.TIF
,FILE31=00000031.TIF
,FILE32=00000032.TIF
,FILE33=00000033.TIF
,FILE34=00000034.TIF
,FILE35=00000035.TIF
,FILE36=00000036.TIF
,FILE37=00000037.TIF
,FILE38=00000038.TIF
,FILE39=00000039.TIF
,FILE40=00000040.TIF
,FILE41=00000041.TIF
,FILE42=00000042.TIF
,FILE43=00000043.TIF
,FILE44=00000044.TIF
,FILE45=00000045.TIF
,FILE46=00000046.TIF
,FILE47=00000047.TIF

FILE48=00000048.TIF
,FILE49=00000049.TIF
,FILE50=00000050.TIF
,FILE51=00000051.TIF
,FILE52=00000052.TIF
,FILE53=00000053.TIF
,FILE54=00000054.TIF
,FILE55=00000055.TIF
,FILE56=00000056.TIF
,FILE57=00000057.TIF
,FILE58=00000058.TIF
,FILE59=00000059.TIF
,FILE60=00000060.TIF
,FILE61=00000061.TIF
,FILE62=00000062.TIF
,FILE63=00000063.TIF
,FILE64=00000064.TIF
,FILE65=00000065.TIF
,FILE66=00000066.TIF
,FILE67=00000067.TIF
,FILE68=00000068.TIF
,FILE69=00000069.TIF
,FILE70=00000070.TIF
,FILE71=00000071.TIF
,FILE72=00000072.TIF
,FILE73=00000073.TIF
,FILE74=00000074.TIF
,FILE75=00000075.TIF

FILE76=00000076.TIF
,FILE77=00000077.TIF
,FILE78=00000078.TIF
,FILE79=00000079.TIF
,FILE80=00000080.TIF
,FILE81=00000081.TIF
,FILE82=00000082.TIF
,FILE83=00000083.TIF
,FILE84=00000084.TIF
,FILE85=00000085.TIF
,FILE86=00000086.TIF
,FILE87=00000087.TIF
,FILE88=00000088.TIF
,FILE89=00000089.TIF
,FILE90=00000090.TIF
,FILE91=00000091.TIF
,FILE92=00000092.TIF
,FILE93=00000093.TIF
,FILE94=00000094.TIF
,FILE95=00000095.TIF
,FILE96=00000096.TIF
,FILE97=00000097.TIF
,FILE98=00000098.TIF
,FILE99=00000099.TIF
,FILE100=00000100.TIF
,FILE101=00000101.TIF
,FILE102=00000102.TIF
,FILE103=00000103.TIF

FILE104=00000104.TIF
,FILE105=00000105.TIF
,FILE106=00000106.TIF
,FILE107=00000107.TIF
,FILE108=00000108.TIF
,FILE109=00000109.TIF
,FILE110=00000110.TIF
,FILE111=00000111.TIF
,FILE112=00000112.TIF
,FILE113=00000113.TIF
,FILE114=00000114.TIF
,FILE115=00000115.TIF
,FILE116=00000116.TIF
,FILE117=00000117.TIF
,FILE118=00000118.TIF
,FILE119=00000119.TIF
,FILE120=00000120.TIF
,FILE121=00000121.TIF
,FILE122=00000122.TIF
,FILE123=00000123.TIF
,FILE124=00000124.TIF
,FILE125=00000125.TIF
,FILE126=00000126.TIF
,FILE127=00000127.TIF
,FILE128=00000128.TIF
,FILE129=00000129.TIF
,FILE130=00000130.TIF
,FILE131=00000131.TIF

FILE132=00000132.TIF
,FILE133=00000133.TIF
,FILE134=00000134.TIF
,FILE135=00000135.TIF
,FILE136=00000136.TIF
,FILE137=00000137.TIF
,FILE138=00000138.TIF
,FILE139=00000139.TIF
,FILE140=00000140.TIF
,FILE141=00000141.TIF
,FILE142=00000142.TIF
,FILE143=00000143.TIF
,